अन्वाधानसङ्ग्रहः





श्रीलक्ष्मीनारायणशर्माभिनन्दनसमितिः

रौप्यपीठपुरम्

अन्वाधानसङ्ग्रहः

(नानाशान्तिपौष्टिककर्मणामन्वाधानानां सङ्ग्रहात्मकः)

उडुपिसंस्कृतमहापाठशालाया निवृत्तप्रांशुपालाय

श्रीपडुबिद्रिलक्ष्मीनारायणशर्मणे

सम्मानसमित्या प्रकाश्य समर्पितः

श्रीलक्ष्मीनारायणशर्माभिनन्दनसमितिः

उडुपि

ANVĀDHĀNASAṄGRAHAḤ A Collection of Anvādhānas used in several rituals and Shānthi Pouṣṭikakarmas.

Published by : THE LAKSHMINARAYANA SHARMĀBHINANDANA SAMITHI, UDUPI to commemorate Sharma's Sixtieth Birthday celebration.

First Impression : 2004

Price : Rs.**75-00**

अन्वाधानसङ्ग्रहसम्पादनसमितिः

प्रधानसम्पादकः **श्रीमान् शिबरूरुहयग्रीवतन्त्री**

सम्पादकाः
श्रीमान् चित्रापुरगोपालकृष्णाचार्यः
श्रीमान् उच्चिलहरिदासभट्टः
श्रीमान् उच्चिलश्रीपत्युपाध्यायः
श्रीमान् कुम्भाशिश्रीपत्युपाध्यायः
श्रीमान् नन्दलिकेविठ्ठलभट्टः
श्रीमान् देरेबैलुशिवप्रसादतन्त्री


परिशोधकौ
श्रीमान् पडुबिद्रिलक्ष्मीनारायणशर्मा
श्रीमान् शिबरूरुवेदव्यासतन्त्री

Copies available at: SrimanMadhvaSiddhanta Granthalaya, Car Street, UDUPI

DTP by: Navadurga Lasertech,
C/o. Dr. K. Padmanabha Kekunnaya, UDUPI-576 102. [Ph. 2531159]

Printed at: Honna Padma Printers, UDUPI-576 101.

IN FELICITATION TO



SRI P. LAXMINARAYANA SHARMA

B.SC., M.A., VIDWAN IN - ALANKARA,
DWAITA VEDANTA & VYAKARANA

PRINCIPAL (1984-2002)
S.M.S.P. SAMSKRIT COLLEGE
UDUPI

ಶ್ರೀ ವಿದ್ಯಾಧೀಶತೀರ್ಥ ಶ್ರೀಪಾದರು
ರು ಶ್ರೀ ಮಧ್ವಾಚಾರ್ಯ ಮೂಲ ಮಹಾಸಂಸ್ಥಾನ
ಯ ಶ್ರೀ ಪಲಿಮಾರು ಹೃಷೀಕೇಶ ಮಠ
ಷ್ಣ ಮಠ, ಉಡುಪಿ - 576 101
: 08252 - 520598
: 523402



H H Sri Sri Vidyadheesha Theertha Swamiji
Jagadguru Sri Madhwacharya Moola Mahasamsthanam
Paryaya Sri Palimaru Hrishikesha Matha
Sri Krishna Matha, Udupi - 576 101
Ph. : 08252 - 520598
Fax : 523402



-S-L(8) / 67

शुभाशंसनम्

'कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः' इति उपनिषत् यावज्जीवं कर्म विधत्ते । र्म अकृत्वा स्थातुम् अवकाशः शास्त्रकारेण न प्रादायि । ज्ञानैकमार्गावलंबिनः, भगवद्गीतातात्पर्यम् वगन्तुम् अशक्ताः कर्म धिक्कुर्वन्ति। परन्तु ज्ञानाविरोधि ज्ञानसाधनं कर्म कदापि न त्याज्यम्। र्मणः त्रिविधा अवस्था अस्ति । अज्ञान्यवस्थायां कृतं कर्म अंतरंगं शोधयति। जिज्ञासुना तं कर्म ज्ञानम् आदधाति । ज्ञानिना कृतं कर्म मोक्षे सुखातिशयं विधत्ते । येन केनापि हातुम् शक्यम् इदं कर्म नूनं निष्कामं सज्ञानं विधेयम् । 'तत् कर्म हरितोषं यत्' इति श्रीकृष्णेन द्भवगीतायां भगवत्प्रसादहेतुं कर्म अवश्यानुष्ठेयम् उदघोषि ।

प्राचीनकालेषु कर्म यथा अनुष्ठितं तथा अनुष्ठातुं न शक्यते अद्य । यतः कर्मणः प्रवाहः ष्कः । पूर्वं कथमासीत् इति निर्णेतुम् अथवा अनुष्ठातुं दुश्शकम् । योऽयं मार्गः इदानीमस्ति : लुप्तः न स्यात् इति धिया अयं प्रयत्नः विहितः । पुरोधसाम् अत्युपयोगि संग्राह्यतमं इदं स्तकं पुरोधोवर्यैः महता यत्नेन निरमायि ।

निवृत्तमार्गं जिघृक्षूणां प्रवृत्तिमार्गं जिहासूनां श्रीलक्ष्मीनारायणशर्मणां निमित्तेन इयं तिः प्रादुरभावि । तेषां कृते दातुं विधातुम् अथवा तान् तोषयितुं व्यापारान्तरम् अन्विष्य न्विष्यापि अलभमानाः तच्छिष्याः तदभिमानिनः इमां सुकृतिं चक्रिरे । अनयाच संतुष्टः तर्यामी भगवान् उडुपि श्रीकृष्णः मुख्यप्राणश्च अनुगृह्णातु प्रांशुपालान् श्री लक्ष्मीनारायण–र्मणः । अस्याः सुकृतेः कृते कृतभूरिपरिश्रमान् साभिमानम् अभिनन्द्य भगवदनुग्रहं प्रार्थयामः।

प्रेमनारायणस्मरणानि

ो श्री विद्याधीशतीर्थ श्रीपादाः

श्रीलक्ष्मीनारायणशर्माभिनन्दनसमितिः

गौरवाध्यक्षाः	श्रीश्री विश्वप्रियतीर्थश्रीपादाः अदमारुमठः, उडुपि
अध्यक्षाः	श्रीश्री विद्याधीशतीर्थश्रीपादाः पलिमारुमठः, उडुपि
उपाध्यक्षौ	श्रीमान् श्रीशबल्लाळः
	श्रीमान् हरिदासोपाध्यायः
कार्यदर्शी	श्रीमान् डा। एच्. के. सुरेशाचार्यः
सदस्याः	श्रीमान् एस्. वेदव्यासतन्त्री
	श्रीमान् डा। एन्. लक्ष्मीनारायणभट्टः
	श्रीमान् आर्. हरिदासभट्टः
	श्रीमान् एस्. राघवेन्द्रोपाध्यायः
	श्रीमान् डि. एस्. अमृतेशः
	श्रीमान् एस्. सत्यनारायणवेङ्कटरावः
	श्रीमान् डि. शिवप्रसादः
	श्रीमान् के. रामचन्द्रोपाध्यायः
	श्रीमान् दासुनायरि
	श्रीमान् एन्. कृष्णमूर्तिबल्लाळः
	श्रीमान् ए. हरिकृष्णराव्
	श्रीमान् ए. कृष्णमूर्त्युपाध्यायः
	श्रीमान् यु. अण्णप्पः

* * *

प्रास्ताविकम्

पावने उडुपिक्षेत्रे भगवतः श्रीकृष्णस्य सन्निधाने कर्मन्दीश्वरा अष्टमठाधिपतयो गैर्वाण्याः, विशेषतो मध्वसिद्धान्तस्य निरन्तर-प्रसाराय श्रीमन्मध्वसिद्धान्तप्रबोधिनीसंस्कृतमहापाठशालां वर्षशतकात्प्राक् प्रत्यतिष्ठिपन् । श्रीहरिवायुप्रसादेन दिनेदिने प्रवर्धमानेयं महापाठशाला सहस्रशो विदुषः समसीषधत् ये च नैकशास्त्रपारदृश्वानः संस्कृतमर्मज्ञा दिक्षु विदिक्षु च प्रसृत्वराः सारस्वतसेवायां सुतमां निरता राराज्यन्ते । शालायामस्यां प्राध्यापकपदं प्रांशुपालपदञ्चाधिष्ठाय दशकत्रयाधिकवर्षेषु निःस्पृहां स्पृहणीयां च सेवां विधायातीतवर्षे विश्रान्ताः श्रीमन्तः पडुबिद्रिलक्ष्मीनारायणशर्माणः परिग्रहपराङ्मुखाः किमप्युपायनं शिष्यैरभिमानिभिश्चोपह्रियमाणं नैच्छन्निति तेषां समभिनन्द-नार्थं बहुजनोपयोगि पुस्तकमेकं प्रकाशयितुं निरणायि । तदर्थं च समितिरियं निरमायि । सैषा समितिः सोत्साहं कार्यप्रवृत्ता ग्रन्थसम्पादनसमितिमेकां सम्पाद्य पुरोधसामत्युपयुक्तमिमम् **'अन्वाधानसङ्ग्रहं'** शर्मणां षष्टितमाब्दशुभावसरेऽस्मिन् जनतायै उपहरति । ग्रन्थेनानेन शर्मणां संस्मरणं चिरन्तनं भूयात् । ततश्च तेषामैहिकमामुष्मिकञ्च श्रेयो भूयोभूयोऽभि-वर्धतामिति क्षेत्राधिपतिं रुक्मिणीजानिं प्राणनाथञ्च नाधामहे । ग्रन्थस्यास्य सम्पादने कृतभूरिपरिश्रमाः समितिसदस्याः अन्ये

च विद्वांस उत्तमर्णतामर्हन्ति । अक्षरसंयोजका मुद्रका अपि नितरामभिनन्द्यन्ते ।

सुभानुवत्सरे	**अध्यक्षाः सदस्याश्च**
पौषशुक्लद्वादशी	श्रीलक्ष्मीनारायणशर्माभिनन्दनसमितिः
सोमवासरः	उडुपि
05-01-2004	

विषयानुक्रमणिका

होमप्रकरणम्

शान्तिहोमप्रकरणम्

जननकालिकदोषशान्तयः

व्रतोद्यापनहोमप्रकरणम्

आगमोक्तहोमप्रकरणम्

* * *

॥ श्रीगुरुभ्यो नमः ॥

सर्वहोमसाधारणी वैष्णवपद्धतिः

(एष क्रमः गृह्योक्तसंस्कारकर्माणि विहाय अन्यहोमेष्ववश्यं कर्तव्यः)

स्थण्डिलमध्ये श्वेतमृदं पूरयित्वा प्रागायता उदगायताश्च प्रत्येकमष्टाष्टरेखाः विलिख्य पदेषु ईशानादारभ्य प्रादक्षिण्येन अकाराद्येकोनपञ्चाशद्वर्णान् (मध्ये हळक्षवर्णान् च) विलिख्य पीठपूजापूर्वकम् अजादिमूर्तीरावाह्य तिस्रः देवीः आवाहयेत् ।

ध्यानम् स्वभर्तुः संस्थितामङ्के देवानां हव्यवाहिनीम् ।
रक्तवर्णां रक्तवस्त्रां स्वाहामग्निप्रियां भजे ॥
उद्यद्दिवाकरसमूहनिभां स्वभर्तु-
रङ्कस्थितामभयसद्वरबाहुयुग्माम् ।
मुद्रां च तत्त्वदृशये वरपुस्तकं च
दोर्युग्मकेन दधतीं स्मरतात्मविद्याम् ॥

कौशेयरक्तवसनामरविन्दनेत्रां
पाशाङ्कुशाभयवरोद्यतपद्महस्ताम् ।
उद्यच्छतार्कसदृशीं परमाङ्कसंस्थां
ध्यायेद्विधीशनतपादयुगां जनित्रीम् ॥

स्वाहादेवीं तदन्तर्गतां भारतीं तदन्तर्गतां लक्ष्मीं

तदन्तर्गतनृसिंहं च तत्त्वन्यासमातृकान्यासपूर्वकं षोडशोपचारैः पूजयेत् ॥ ततः स्थण्डिले षड्रेखोल्लेखनादिकं कुर्यात् ॥

अन्वाधनम्- अस्मिन्नन्वाहिते अग्नौ अग्नेः गर्भाधानादिषोडश-संस्कारार्थं व्यस्तसमस्तव्याहृतिभिः षोडशवारमाज्येन पुनः वैष्णवत्वसिद्ध्यर्थम् अष्टाक्षरकृष्णषडक्षरद्वादशाक्षरमन्त्रैः अष्टाष्टवारमाज्येन, विष्णुगायत्र्या अष्टवारमाज्येन, पुरुषसूक्तेन प्रत्यृचमेकैकवारमाज्येन, समस्तव्याहृत्या पूर्णाहुतिं चाज्येन, पीठदेवतामन्त्रैः सकृत्सकृदाज्येन, लक्ष्म्याद्यावरणदेवताश्च सकृत्सकृदाज्येन,

जातवेदसमग्निमिध्मेन, प्रजापतिं प्रजापतिं चाघारदेवते आज्येन, अग्नीषोमौ चक्षुषी आज्येन, पुनः **प्रधानदेवतान्तर्गत भगवद्रूपम् [यथा गणपतिहोमे विश्वम्भरं शान्तिहोमेषु शान्तिदेवतान्तर्यामिश्रीलक्ष्मीनरसिंहं]** तन्मन्त्रेण दशवारमाज्येन, पुनः अत्र प्रधानं प्रधानदेवतां....... [अग्रे वक्ष्यमाणस्यान्वाधानस्य योजना कर्तव्या]

शेषेण स्विष्टकृतमग्निम्, इध्मसन्नहनेन रुद्रं, विश्वान् देवान् संस्रावेण, अयासमग्निं-देवान्-विष्णुम्-अग्निं-वायुं-सूर्यं प्रजा-पतिं चैताः प्रायश्चित्तदेवता आज्यद्रव्येण, ज्ञाताज्ञातदोष-निबर्हणार्थम् अनाज्ञातद्वयेनाग्निं, न्यूनातिरिक्तदोषप्राय-श्चित्तार्थम् अग्निं, मन्त्रविपर्यासादिदोषप्रायश्चित्तार्थं मरुतश्च पृथक् पृथक् आज्येन, एता अङ्गदेवताः प्रधानदेवताः

प्रायश्चित्तदेवताः ताः सर्वाः सन्निहिताः सन्तु । एवं साङ्गोपाङ्गेन कर्मणा सद्यो यक्ष्ये ।

(विष्णुदेवताकप्रधानहोमे प्रधानाहुत्यनन्तरं लक्ष्म्याद्यावरण-देवताः हुनेत् । इतरदेवताकहोमेषु लक्ष्म्याद्यावरणदेवताः प्रधानहोमात्पूर्वमेव हुत्वा, प्रधानहोमानन्तरम् इन्द्रादिलोक-पालान् हुनेदिति विशेषः ।)

भृगु ऋषिः । गायत्री छन्दः । वैश्वानरो देवता ।

रां सहस्रार्चिषे हृदयाय नमः । रीं स्वस्तिपूर्णात्मने शिरसे स्वाहा । रूं उत्तिष्ठपुरुषात्मने शिखायै वषट् । रैं धूमव्यापिने कवचाय हुम् । रौं सप्तजिह्वात्मने नेत्रत्रयाय वौषट् । रः धनुर्धराय अस्त्राय फट् ॥

ध्यानम् त्रिनयनमरुणाप्ताबद्धमौलिं सुशुक्लां-
शुकमरुणमनेकाकल्पमम्भोजसंस्थम् ।
अभिमतवरशक्तिस्वस्तिकाभीतिहस्तं
नमत कनकमालालङ्कृताङ्गं कृशानुम् ॥

रम् अग्नये नमः । (अन्तर्गतं वायुं ध्यायेत् ।)

उद्यद्रविप्रकरसन्निभमच्युताङ्के
स्वासीनमस्य नुतिनित्यवचःप्रवृत्तिम् ।
ध्यायेद् गदाऽभयकरं सुकृताञ्जलिं तं
प्राणं यथेष्टतनुमुन्नतकर्मशक्तिम् ॥

(अन्तर्गतं परशुरामं ध्यायेत् ।)

अङ्गारवर्णमभितोऽण्डबहिः प्रभाभिः
व्याप्तं परश्वधधनुर्धरमेकवीरम् ।
ध्यायेदजेशपुरुहूतमुखैः स्तुवद्भि-
रावीतमात्मपदवीं प्रतिपादयन्तम् ॥

रां रामाय नमः । अग्न्यन्तर्गतभारतीरमणमुख्यप्राणस्थपरशुरामाय नमः ॥

चरुपायसपरमान्नद्रव्यहोमेषु स्विष्टकृत्प्रसङ्गे तत्तद्द्रव्येण, इतरद्रव्यहोमेषु आज्येनैव स्विष्टकृदिति ज्ञेयम् ॥

* * *

होमप्रकरणम्

1.

गणपतिहोमः (क्षिप्रफलप्रदः)

कौशिक ऋषिः। गायत्री छन्दः। गणपतिर्देवता।

क्षिप्र,[१] प्रसादाय, नमः, क्षिप्र, प्रसादाय, नमः, इति षडङ्गानि।

ध्यानम् रक्ताम्बरो रक्ततनू रक्तमाल्यानुलेपनः।
महोदरो गजमुखः पाशदन्ताङ्कुशाभये।
बिभ्रद् ध्येयो विघ्नहरः कामदस्त्वरया ह्ययम्॥

मन्त्रः ॐ क्षिप्रप्रसादाय नमः ॐ

गणक ऋषिः। निचृद्गायत्री छन्दः। महागणपतिर्देवता।

गां, गीं, गूं, गैं, गौं, गः इति षडङ्गानि।

ध्यानम् बीजापूरगदेक्षुकार्मुकलसच्चक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः।
ध्येयो वल्लभया सपद्मकरयाऽश्लिष्टोज्ज्वलद्भूषया
विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नो विशिष्टार्थदः॥

मन्त्रः ॐ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।

अन्वाधानम् : प्रधानदेवतां गणपतिं मूलमन्त्रेण पूर्वाज्यापराज्ययुक्तमोदकादिसम्मिश्राष्टद्रव्येण .... सङ्ख्यया

---

१. अनुक्तिस्थले हृदादिमन्त्राः संयोज्याः। देवतायाः द्विनेत्रत्वे नेत्राभ्यां वौषट्, त्रिनेत्रत्वे नेत्रत्रयाय वौषडिति ज्ञेयम्।

(एकैकनालिकेरस्य चतुश्चतुस्सङ्ख्याक्रमेण नालिके सङ्ख्यानुगुणसङ्ख्यया) अयासमग्निं देवान्........ ॥

* * *

2. गणपत्यथर्वशीर्षहोमः

गणक ऋषिः । निचृद्गायत्री छन्दः । गणपतिर्देवता ।

गामित्यादि षडङ्गानि ।

ध्यानम् एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ।
रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥
रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ।
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् ।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥

मन्त्रः ॐ गं गणपतये नमः ॐ ।

हवनमन्त्रः ॐ नमस्ते गणपतये .... इत्युपनिषत् ॥

अन्वाधानम्: प्रधानदेवतां गणपतिम् अथर्वशीर्षमन्त्रखण्डैः शतावर्तनक्रमेण प्रतिखण्डं दूर्वाङ्कुर-लाज-मोदक-साज्य-समिद्द्रव्यैः प्रत्येकं प्रत्येकं सहस्रवारं ..... सद्यो यक्ष्ये ॥

* * *

3. बालगणपतिहोमः (विवाहयोगप्रदः)

शक्तिसम्मोहन ऋषिः। गायत्री छन्दः। बालगणपतिर्देवता ।

ॐ ग्गं क्कं ल्लं रां हृदयाय नमः।

ॐ ग्गं क्कं ल्लं रीं शिरसे स्वाहा।

ॐ ग्गं क्कं ल्लं रूं शिखायै वषट्।

ॐ ग्गं क्कं ल्लं रैं कवचाय हुम्।

ॐ ग्गं क्कं ल्लं रौं नेत्रभ्यां वौषट्।

ॐ ग्गं क्कं ल्लं रः अस्त्राय फट्॥

ध्यानम् बालः प्रसूतमात्रोऽयम् अम्बिकाङ्के निवेशितः।
अतिरक्तो गजमुखो द्विरदो रत्नभूषणः॥
चषकं पुष्करे बिभ्रत् सृणिपाशौ करद्वये।
द्वाभ्यां कल्पलतां दोर्भ्यां दोलयन् रत्नवर्षिणीम्॥

मन्त्रः ॐ ऐं ह्रीं ग्गं क्कं ल्लं रीं ह्रीं सौः ॐ॥

अन्वाधानम् : प्रधानदेवतां बालगणपतिं हरिद्राचूर्णसम्मिश्र-कदलीफलमधुशर्करयुक्तषण्णालिकेरप्रसूनद्रव्येण अष्टोत्तर-सहस्रवारं बालगणपतिमन्त्रेण .... यक्ष्ये॥

(होमोऽयं सूर्योदयात् पूर्वमेव कार्यः॥)

* * *

4. गर्भाधानहोमः

प्रधानं प्रजापतिं चरुणा एकवारं, विष्णुं षड्वारं, प्रजापतिमेकवारमाज्येन मध्ये गृह्योक्ततन्त्रेण चरुशेषेण स्विष्टकृतम् ..... ॥

* * *

5. पुंसवनादिः

प्रधानं प्रजापतिं चरुणा एकवारं, मध्ये दूर्वारससेचनादि गृह्योक्ततन्त्रेण, (सीमन्तोन्नयने पुनः सद्य एव क्रियमाणे) द्विर्धातारं, द्वी राकां, त्रिर्विष्णुं प्रजापतिमेकवारमाज्येन मध्ये उन्नयनादि गृह्योक्ततन्त्रेण, चरुशेषेण स्विष्टकृतम् ।

* * *

6. चौलम्

प्रधानं त्रिरग्निं पवमानं प्रजापतिं चैकवारमाज्येन, मध्ये चौलकर्मादि गृह्योक्ततन्त्रेण, आज्यशेषेण स्विष्टकृतम् ...... ॥

* * *

7. उपनयनम्

प्रधानं त्रिरग्निं पवमानं प्रजापतिं चाज्येन, मध्ये उपनयनादि गृह्योक्ततन्त्रेण (अनुप्रवचनीयहोमे सद्य एव क्रियमाणे सदसस्पतिं सवितारम् ऋषींश्च एकैकवारं चरुद्रव्येण) शेषेण स्विष्टकृतम्....॥

8. समावर्तनम्

प्रधानं सवितारं व्रतचतुष्टयलोपप्रायश्चित्तार्थं गायत्र्या शतवारमाज्येन, समावर्तनाङ्गत्वेन त्रिरग्निं पवमानं प्रजापतिं च एकवारमाज्येन, अग्निमुपरि निहितसमिधा, विश्वान् देवान् दशसमिद्भिः, मध्ये श्मश्रुकर्मादि गृह्योक्ततन्त्रेण आज्यशेषेण स्विष्टकृतम् ..... ॥

* * *

9. विवाहः

प्रधानं त्रिरग्निं पवमानं सकृदग्निं प्रजापतिञ्चाज्येन, पुनरर्यमाग्निं वरुणाग्निं पूषाग्निं प्रजापतिञ्च लाजद्रव्येण, मध्ये पाणिग्रहणपरिणयनादि गृह्योक्ततन्त्रेण (गृहप्रवेशहोमपक्षे तु सूर्यासावित्रीं चतुर्वारमाज्येन) आज्यशेषेण स्विष्टकृतम्....... ॥

* * *

10. धन्वन्तरिहोमः (आरोग्यप्रदः)

ब्रह्मा ऋषिः । गायत्री छन्दः । धन्वन्तरिर्देवता ॥

पूर्णज्ञानात्मने, पूर्णैश्वर्यात्मने, पूर्णप्रभात्मने, पूर्णानन्दात्मने, पूर्णतेज आत्मने, पूर्णशक्त्यात्मने इति षडङ्गानि ।

ध्यानम् : चन्द्रौघकान्तिममृतोरुकरैर्जगन्ति
संजीवयन्तममितात्मसुखं परेशम् ।

ज्ञानं सुधाकलशमेव च सन्दधानं
शीतांशुमण्डलगतं स्मरतात्मसंस्थम् ॥

मन्त्रः ॐ धं धन्वन्तरये नमः ॐ

वेदोक्तधन्वन्तरिमन्त्रः

ब्रह्मा ऋषिः अनुष्टुप् छन्दः धन्वन्तरिर्देवता ।

मन्त्रपादैः समस्तेन पञ्चाङ्गानि ।

मन्त्रः अयं मे हस्तो भगवानयं मे भगवत्तरः ।
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥

अन्वाधानम् : प्रधानदेवतां धन्वन्तरिरूपिपरमात्मानं धन्वन्तरिमूलमन्त्रेण क्षीराज्याक्तगुळूचिद्रव्येण अष्टोत्तर-सहस्रवारं, पुनः धन्वन्तरिं वैदिकधन्वन्तरिमन्त्रेण क्षीराज्याक्तापामार्गसमिद्द्रव्येणाष्टोत्तरशतवारं, पुनः प्रधान-देवतां धन्वन्तरिरूपिपरमात्मानं मूलेन क्षीराज्याक्त-गुळूचिद्रव्येण (आज्येन वा) षोडशोत्तरद्विशतवारं (२१६), पुनः प्रधानदेवतां धन्वन्तरिं मूलेन क्षीराज्याक्तचतु-स्सङ्ख्याकदूर्वाद्रव्येण अष्टोत्तरशतवारम्, आज्यशेषेण स्विष्टकृतम् ... ॥

* * *

11.

पुरुषसूक्तहोमः

प्रधानदेवतां पुरुषं पुरुषसूक्तमन्त्रैः षोडशावर्तनक्रमेण षट्पञ्चाशदुत्तरद्विशतवारम् अश्वत्थसमिदाज्यपायसद्रव्यैः, शेषेण स्विष्टकृतम् ...... ॥

* * *

12.

श्रीसूक्तहोमः

प्रधानदेवतां महालक्ष्मीं बिल्वसमिदाज्यपायसद्रव्यैः श्रीसूक्त-मन्त्रैः पञ्चदशावर्तनक्रमेण पञ्चविंशत्यधिकद्विशतवारं, शेषेण स्विष्टकृतम् .... ॥

* * *

13.

सुकृतहोमः

प्रधानदेवतां पुरुषरूपिपरमात्मानं पुरुषसूक्तेन षोडशा-वर्तनक्रमेण षट्पञ्चाशदुत्तरद्विशतवारमाज्यद्रव्येण, पुनः महालक्ष्मीं श्रीसूक्तेन पञ्चदशावर्तनक्रमेण पञ्चविंशत्यधिक-द्विशतवारमाज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

* * *

14.

सन्तानप्रदपुरुषसूक्तहोमः

प्रधानदेवतां पुरुषरूपिपरमात्मानं पुरुषसूक्तेन प्रत्यृचमेकैक वारमाज्येन, पुनः पुरुषसूक्तेन अवदानधर्मेण प्रत्यृचं चरुद्रव्येण,

पुनः षोडशऋग्भिराज्येन, पुनः पुरुषसूक्तेन प्रत्यृचमश्वत्थ-समिधा अश्वत्थपत्रस्थापनादितन्त्रेण, पुनः पुरुषसूक्तेन प्रत्यृचमेकैकवारमाज्येन, पुनः पुरुषसूक्तेन एकैकवारं क्षीर-पायसद्रव्येण, पुनः पुरुषसूक्तेनैकेकवारमाज्येन पुनः त्रिषष्टिवारं पुरुषसूक्तावर्तनेन अष्टोत्तरसहस्राहुतीराज्येन (१६x६३= १००८), पायसशेषेण स्विष्टकृतम् ...... ॥

अश्वत्थपत्रस्थापनादितन्त्रम्

यजमानस्य पुरतः स्थण्डिलमारचय्य पूर्वाग्रान् दर्भान् प्रसार्य अश्वत्थसमिद्धोमकाले यजमानः प्रत्यृचं पङ्क्तिद्वये षोडशाश्वत्थ-पत्राणि स्थापयेत् ।

ततः आज्याहुतिकाले प्रत्यृचं पत्राणि क्रमेण अभिघारयेत् । पायसहोमकाले किञ्चित् होमावशिष्टपायसं प्रत्यृचं क्रमेण पत्रे स्थापयेत् । पुनः आज्याहुतिकाले पायसमभिघारयेत् । यजमानः अन्यदश्वत्थपत्रमाच्छादयेत् ।

पूर्णाहुत्यनन्तरं यजमानपत्नी पत्रस्थितपायसं पुरुषसूक्तेन प्रत्यृचं स्वाहाकारसहितं क्रमेण प्राशयेत् । उद्देशत्यागः नास्ति ।

* * *

15. सन्तानप्रदगोपालकृष्णहोमः

नारद ऋषिः । अनुष्टुप् छन्दः । श्रीसन्तानगोपालकृष्णो देवता ॥

मन्त्रपादैः समस्तेन च पञ्चाङ्गानि ।

ध्यानम्: शङ्खचक्रगदापद्मं धारयन्तं जनार्दनम् ।
अङ्के शयानं देवक्याः सूतिकामन्दिरे शुभे ।
एवंरूपं सदा कृष्णं सुतार्थी भावयेत्सुधीः ॥
सोऽचिराल्लभते पुत्रमायुष्मन्तं सुवर्चसम् ।
सन्ततेश्चाधिकर्तारं विष्णुभक्तं महामतिम् ॥

मन्त्रः देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥

अन्वाधानम् : प्रधानदेवतां श्रीसन्तानगोपालकृष्णं 'देवकीसुत गोविन्द' इति श्लोकमन्त्रेण अश्वत्थसमिदाज्यपायसद्रव्यैः अष्टोत्तरशतवारं (अष्टोत्तरसहस्र वारं वा), शेषेण स्विष्टकृतम् .... ॥

* * *

16. पवमानहोमः

प्रधानदेवताः सोमं पवमानं चत्वारिंशद्वारं, समिद्धमग्निं पवमानमेकवारं तनूनपादमग्निं पवमानमेकवारम्, इळोऽग्निं पवमानमेकवारं, बर्हिषमग्निं पवमानमेकवारं, द्वारो देवीः श्रियो दासीरग्निं पवमानमेकवारं, नक्तोषसौ अग्निं पवमानमेकवारं, दैव्यौ होतारौ प्रचेतसावग्निं पवमानमेकवारम्, इळाभारती-सरस्वतीरग्निं पवमानमेकवारं, त्वष्टारमग्निं पवमानमेकवारं,

वनस्पतिमग्निं पवमानमेकवारं, स्वाहाकृतीरग्निं पवमानमेकवा
सोमं पवमानं पञ्चदशोत्तरपञ्चशतवारम्, अग्निं पवमानं त्रिवा
सोमं पवमानमष्टादशवारं, पूषणं पवमानं त्रिवारं, सोमं पवमा
दशवारम्, अग्निं पवमानं द्विवारं, सवितारं पवमानमेकवार
अग्निसवितारौ पवमानमेकवारं, विश्वान् देवान् पवमानमेकवा
सोमं पवमानं त्रिवारं, पावमान्यध्येतारं पवमानं द्विवारम् एत
प्रधानदेवताः आज्यद्रव्येण (घृताक्ततिलद्रव्येण वा), आवर
देवताः एकैकवारमाज्येन, आज्यशेषेण स्विष्टकृतम् ....

* * *

17. पञ्चगव्यहोमः

प्रधानं विष्णुं द्विवारं, रुद्रं द्विवारं, ब्रह्माणमग्निं सोमं सवित
प्रजापतिश्चैकैकवारमाज्यद्रव्येण, पुनः प्रधानदेवतां सविता
मष्टोत्तरशतवारं ब्रह्मकूर्चेन पञ्चगव्येन, आज्यशेषेण स्विष्टकृ
.... ॥ [पञ्चगव्यप्रकरणोक्ताः मन्त्राः]

* * *

18. विष्णुसहस्रनामहोमः

प्रधानदेवतां नारायणं विष्णुसहस्रनामभिः अश्वत्थसमिदा
पायसतिलद्रव्यैः एकैकवारं शेषेण स्विष्टकृतम् ...... ॥

* * *

19.

भूवराहमन्त्रहोमः

(भूगृहरक्षार्थम्)

ब्रह्मा ऋषिः गायत्री छन्दः श्रीवराहो देवता ।

पूर्णज्ञानात्मने इत्यादिषडङ्गानि ।

ध्यानम्: श्यामः सुदर्शनदराभयसद्वरेतो
भूम्या युतोऽखिलनिजोक्तपरिग्रहैश्च ।
ध्येयो निजैश्च तनुभिः सकलैरुपेतः
कोलो हरिः सकलवाञ्छितसिद्धयेऽजः ॥

मन्त्रः ॐ हूं वराहाय नमः ॐ ॥

त्रयस्त्रिंशदक्षरवराहमन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । श्रीवराहो देवता ।

पूर्णज्ञानात्मने इत्यादिषडङ्गानि ।

मन्त्रः ॐ हूं नमो भगवते वराहरूपाय भूर्भुवःस्वःपतये भूपतित्वं मे देहि ददापय स्वाहा ॥

अन्वाधानम् : प्रधानदेवतां भूवराहं षडक्षरमूलमन्त्रेण अष्टाविंशतिवारमाज्येन, पुनः त्रयस्त्रिंशदक्षरवराहमन्त्रेण मधुयुक्तलाजतिलसमिदाज्यद्रव्यैः प्रत्येकमष्टोत्तरशतवारं, शेषेण स्विष्टकृतम् ...... ॥

* * *

20. कृष्णमन्त्रहोमः

ब्रह्मा ऋषिः । गायत्री छन्दः । श्रीकृष्णो देवता ।

पूर्णज्ञानात्मने इत्यादिषडङ्गानि ।

ध्यानम्: ध्यायेद्धरिन्मणिनिभं जगदेकवन्द्यं
सौन्दर्यसारमरिशङ्खवराभयानि ।
दोर्भिर्दधानमजितं सरसं च भैष्मी-
सत्यासमेतमखिलप्रदमिन्दिरेशम् ।

मन्त्रः ॐ क्लीं कृष्णाय नमः ॐ ॥

अन्वाधानम् : प्रधानदेवतां श्रीकृष्णं मूलमन्त्रेण अष्टोत्तर-सहस्रवारमाज्येन शेषेण स्विष्टकृतम्........ ।

* * *

21. नृसिंहमन्त्रहोमः

ब्रह्मा ऋषिः गायत्री छन्दः श्रीनृसिंहो देवता ।

मन्त्रपादैः समस्तेन च पञ्चाङ्गानि ।

ध्यानम्: ध्यायेन्नृसिंहमुरुवृत्तरवित्रिनेत्रं
जानुप्रसक्तकरयुग्ममथापराभ्याम् ।
चक्रं दरं च दधतं प्रियया समेतं
तिग्मांशुकोट्यधिकतेजसमग्र्यशक्तिम् ॥

मन्त्रः उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥

अन्वाधानम्: प्रधानदेवतां श्रीनृसिंहं मूलमन्त्रेण अष्टोत्तर-सहस्रवारमाज्येन शेषेण स्विष्टकृतम् ...... ॥

* * *

22.

नामत्रयमन्त्रहोमः

(दुरितपरिहारार्थम्)

अन्तर्यामी ऋषिः । गायत्री छन्दः । नामत्रयवाच्यः परमात्मा देवता ॥

पूर्णज्ञानात्मने इत्यादिषडङ्गानि ।

ध्यानम् : उद्यद्भास्वत्................ निःशेष शक्तिमान् ॥
समस्तदुरितव्याधिसङ्घध्वंसपटीयसे ।
अच्युतानन्तगोविन्दनाम्ने धाम्ने नमोनमः ॥

मन्त्रः ॐ अच्युताय नमोऽनन्ताय नमो गोविन्दाय नमः ॥

एकादशाक्षरमन्त्रस्य कौशिक ऋषिः । विराट् छन्दः । परमात्मा देवता ॥

ध्यानम् : शङ्खचक्रधरं देवं चतुर्बाहुं किरीटिनम् ।
सर्वायुधैरुपेतं तं गरुडोपरि संस्थितम् ॥
सनकादिमुनीन्द्रैश्च सर्वदेवैरुपासितम् ।
प्रातरुद्यत्सहस्रांशुमण्डलोपमकुण्डलम् ॥
सर्वलोकस्य रक्षार्थमनन्तं नित्यमेव हि ।
अभयं वरदं देवं प्रयच्छन्तं मुदान्वितम् ॥

मन्त्रः ॐ अच्युतानन्तगोविन्दाय नमः ॐ ॥

अन्वाधानम् : प्रधानदेवतां परमात्मानं समिदाज्यपयस्तिलैः प्रत्येकम् अष्टोत्तरशतसङ्ख्यया नामत्रयमन्त्रेण, आज्यशेषेण स्विष्टकृतम् .... ॥

* * *

23. मन्युसूक्तहोमः

प्रधानदेवतां मन्युनामकं लक्ष्मीनृसिंहं मन्युसूक्तपुनश्चरणदशांशसङ्ख्यया आज्येन शेषेण स्विष्टकृतम् .... ॥

* * *

24. सुदर्शनहोमः

अहिर्बुध्न्य ऋषिः । गायत्री छन्दः । सुदर्शनो देवता ।

आचक्राय स्वाहा, विचक्राय स्वाहा, सुचक्राय स्वाहा, धीचक्राय स्वाहा, सञ्चक्राय स्वाहा, ज्वालाचक्राय स्वाहा इति षडङ्गानि ।

ध्यानम्: मध्याह्नसूर्यप्रतिमप्रकाशं पिशङ्गनेत्रं स्फुरदट्टहासम् ।
प्रदीप्तहेमाम्बरमग्र्यमीडे चक्रस्थितं चक्रिणमष्टबाहुम् ॥

मन्त्रः ॐ सहस्रार हुं फट् ॐ

अहिर्बुध्न्य ऋषिः । अनुष्टुप् छन्दः ।सुदर्शनो देवता ॥

आचक्राय स्वाहेत्यादिषडङ्गानि ।

कल्पान्तार्कप्रकाशं त्रिभुवनमखिलं तेजसा पूरयन्तं
रक्ताक्षं पिङ्गकेशं रिपुकुलभयदं भीमदंष्ट्राट्टहासम् ।
चक्रं शङ्खं गदाब्जे पृथुतरमुसलं चापपाशङ्कुशास्त्रं
बिभ्राणं दोर्भिराद्यं मनसि मुररिपुं भावये चक्रराजम् ॥

मन्त्रः ॐ ॐ नमो भगवते महासुदर्शनाय हुं फट् ॐ ॥

मालामन्त्रः ॐ क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय पराय परमपुरुषाय परमात्मने परकर्ममन्त्रयन्त्रौषधास्त्रशस्त्राणि संहर संहर मृत्योर्मोचय मोचय ॐ नमो भगवते महासुदर्शनाय दीप्त्रे ज्वालापरीताय सर्वदिक्क्षोभणकराय हुं फट् ब्रह्मणे परं ज्योतिषे नमः[१] ॥

अन्वाधानम् : प्रधानदेवतां सुदर्शनरूपिपरमात्मानं सुदर्शनमन्त्रेण अपामार्गसमिच्चर्वाज्यद्रव्यैः अष्टोत्तरशतसङ्ख्यया चरुशेषेण स्विष्टकृतम् .... ॥

अन्वाधानम् प्रधानदेवतां सुदर्शनरूपिपरमात्मानं मालामन्त्रेण क्रमात् सर्पिः, अपामार्गः, तण्डुलः, सर्षपः, तिलः, पायसम्, पञ्चगव्यम्, सर्पिः एभिरष्टाभिर्द्रव्यैः प्रत्येकं षड्विंशत्यधिकशतवारं शेषेण स्विष्टकृतम् ...... ॥

* * *

---

१. स्वाहा इत्यपि पाठः

25. अघोरहोमः

अघोर ऋषिः। त्रिष्टुप् छन्दः। अघोररुद्रो देवता।

ॐ ह्रीं स्फुर स्फुर, प्रस्फुर प्रस्फुर, घोरघोरतरतनुरूप, चट चट प्रचट प्रचट, कह कह वम वम, बन्ध बन्ध घातय घातय, हुंफट् इति षडङ्गानि॥

ध्यानम्: सजलघनसमाभं भीमदंष्ट्रं त्रिनेत्रं
भुजगधरमघोरं रक्तवस्त्राङ्गरागम्।
परशुडमरुखड्गान् खेटकं बाणचापौ
त्रिशिखनरकपाले बिभ्रतं भावयामि॥

मन्त्रः ॐ ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोरघोरतरतनुरूप चट चट प्रचट प्रचट कह कह वम वम बन्ध बन्ध घातय घातय हुं फट् ॐ॥

अन्वाधानम् : प्रधानदेवतामघोररुद्रं सर्पिरपामार्गतिलसर्षपपायसाज्याख्यषड्द्रव्यैः प्रत्येकम् अष्टषष्ट्युत्तरशतवारं (१६८x६= १००८) (अष्टोत्तरशतवारं वा) शेषेण स्विष्टकृतम्।

* * *

26.

लक्ष्मीहृदयहोमः

(सङ्कलीकरणरीत्या)

अत्र प्रधानदेवतां नारायणं तन्मूलेनाष्टोत्तरशतवारमाज्येन, पुनः नारायणहृदयश्लोकमन्त्रैः त्रिंशदाहुतिभिः पायसेन, पुनः प्रधानदेवतां श्रीमहालक्ष्मीं तन्मूलेनाष्टोत्तरशतवारमाज्येन, पुनः श्रीमहालक्ष्मीहृदयश्लोकमन्त्रैः नवोत्तरशताहुतिभिः पायसेन, पुनः प्रधानदेवतां नारायणं नारायणहृदयश्लोकमन्त्रैः द्विरावृत्त्या पायसेन षष्ट्याहुतिभिः, पुनः प्रधानदेवतां महालक्ष्मीं लक्ष्मीहृदयश्लोकमन्त्रैः पायसेन नवोत्तरशताहुतिभिः, पुनः महालक्ष्मीं मूलेनाष्टोत्तरशतवारमाज्येन, पुनः प्रधानदेवतां नारायणं नारायणहृदयमन्त्रैः त्रिंशदाहुतिभिः पायसेन, पुनः नारायणं मूलेनाष्टोत्तरशतवारमाज्येन, पुनः नारायणं पुरुषसूक्तेन श्रियं च श्रीसूक्तेनैकैकवारमाज्येन, शेषेण स्विष्टकृतम् ... ॥

* * *

27.

लक्ष्मीहृदयहोमः

(सम्पुटीकरणरीत्या)

प्रधानदेवतां विष्णुं नारायणाष्टाक्षरेण अष्टोत्तरशतवारमाज्येन, पुनः 'नारायणः परं ज्योतिः' इत्यारभ्य 'सर्वां सिद्धिं लभेन्नरः' इत्यन्तं श्लोकमन्त्रैः एकैकवारं पायसेन, पुनः प्रधानदेवतां लक्ष्मीं लक्ष्मीमूलमन्त्रेण अष्टोत्तरशतवारमाज्यद्रव्येण, पुनः 'श्रीमत्सौभाग्यजननीमित्यारभ्य' "मह्यमप्यच्युतश्रीः' इत्यन्तं श्लोक-

मन्त्रैरेकैकवारं पायसेन, पुनः लक्ष्मीं मूलेन अष्टोत्तरशतवार-माज्येन नारायणं नारायणहृदयश्लोकमन्त्रैः एकैकवारं पायसेन, पुनः नारायणम् अष्टाक्षरेण अष्टोत्तरशतवारमाज्येन, पुनः नारायणं पुरुषसूक्तेन श्रियं च श्रीसूक्तेनैकैकवारमाज्येन, शेषेण स्विष्टकृतम् .... ॥

* * *

28. दुर्गाहोमः

नारद ऋषिः । गायत्री छन्दः । दुर्गा देवता ॥

ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं ह्रः इति षडङ्गानि ।

ध्यानम्: दूर्वोपमां त्रिनेत्रां च शङ्खचक्रसमन्विताम् ।
शूलतर्जनिसंयुक्तां ध्यायेद्दुर्गामभीष्टदाम् ॥

मन्त्रः ॐ ह्रीं दुं दुर्गायै नमः ॐ ॥

प्रधानदेवतां दुर्गां मूलमन्त्रेण अष्टोत्तरशतवारं बिल्व समिदाज्यपायस(गुडान्नं वा)द्रव्यैः पुनः दुर्गां जातवेदसे इत्यादिपञ्चऋग्भिः प्रत्यृचम् अष्टाविंशतिवारं पूर्वोक्तद्रव्यै पायसशेषेण स्विष्टकृतम् .... ॥

* * *

29.

दुर्गाहोमः

(प्रकारान्तरम्)

प्रधानदेवतां दुर्गां जातवेदसे इतिमन्त्रेण अष्टोत्तरशतसङ्ख्यया परमान्नाज्यद्रव्याभ्यां शेषेण स्विष्टकृतम् .... ॥

* * *

30.

चण्डिकाहोमः

प्रधानदेवतां चण्डिकां नवाक्षरीमन्त्रेण अष्टोत्तरशतवारमाज्येन, प्रधानदेवतां महाकालीं तिलसर्पिःक्षीरमधुशर्करानालिकेरमातुलङ्गयुक्तपरमान्नेन मार्कण्डेयपुराणान्तर्गतप्रथमचरितस्थचतुरुत्तरशतश्लोकमन्त्रेण, पुनः प्रधानदेवतां महालक्ष्मीं द्वितीयचरितस्थपञ्चपञ्चाशदुत्तरशतश्लोकमन्त्रेण पूर्वोक्तद्रव्येण, पुनः प्रधानदेवतां महासरस्वतीं तृतीयचरितस्थैकचत्वारिंशदुत्तरचतुःशतश्लोकमन्त्रेण पूर्वोक्तपरमान्नेन, पुनः चण्डिकां नवाक्षरीमन्त्रेण अष्टोत्तरशतवारमुत्तराज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

* * *

31.

चण्डिकाहोमः

(प्रकारान्तरम्)

जयन्तीमङ्गलाकालीति पक्षम् । प्रधानदेवतां चण्डीं नवाक्षरीमन्त्रेण अष्टोत्तरशतवारमाज्येन, ततः प्रधानदेवताः

श्रीमहाकालीमहालक्ष्मीमहासरस्वतीः मार्कण्डेयपुराणोक्तैः "ॐ ऐं मार्कण्डेय उवाच' इत्यादि "सावर्णिर्भवितामनुः' इत्यन्तं देवीमाहात्म्यमन्त्रैः सप्तशतीसङ्ख्यया त्रिमधुर-द्राक्षा-रम्भाफल-मातुलङ्ग-इक्षुदण्ड-कूष्माण्ड-नालिकेर-यव-तिल-सर्षप-जातीपुष्प-पलाशपुष्प-शर्करा-बन्धूक-बिल्वपत्र-एला-लवङ्ग-पूग-दूर्वाद्यमोघपुष्प-रक्तचन्दन-गुग्गुल-पाटलपुष्प-लाजमिश्रितपरमान्नद्रव्येण, ततः नवाक्षरीमन्त्रेण अष्टोत्तशत-वारमाज्यद्रव्येण, ततः पीठदेवताः अङ्गदेवताः आवरणदेवताः योगिनीदेवताश्च एकैकवारं परमान्नद्रव्येण, अध्यायसमाप्तौ उवाचस्थले च पत्रपुष्पफलैः "नमो देव्यै' इत्यादिश्लोकेन, परमान्नशेषेण स्विष्टकृतम् ॥

* * *

32. भागवतोद्यापनहोमः

प्रधानदेवतां वासुदेवं द्वादशाक्षरमन्त्रेण अष्टोत्तरशतवार-माज्येन, पुनः प्रधानदेवतां सवितृनारायणं ब्रह्मगायत्रीमन्त्रेण अष्टोत्तरशतवारं पलाशसमित्पायसमधुसर्पिर्भिः, पुनः प्रधानदेवतां वेदव्यासं "व्यां वेदव्यासाय नमः' इति मन्त्रेण अष्टोत्तरशतवारमाज्येन, शेषेण स्विष्टकृतम् .... ॥

* * *

33. शिंशुमारहोमः (पुत्रफलप्रदः)

ब्रह्मा ऋषिः । गायत्री छन्दः । शिंशुमाररूपी परमात्मा देवता ॥

शिं, शिंशुमाराय, नमः, शिं, शिंशुमाराय, नमः इत्यङ्गानि ।

ध्यानम्: दंष्ट्राकरालमुखलग्नसुमेरुशृङ्ग-
मिन्दुप्रजापतिमुखैरनुविद्धगात्रम् ।
पुच्छे वहन्तमनिशं ध्रुवमोजसाहं
ध्यायामि पुत्रधनधान्यदशिंशुमारम् ॥

मन्त्रः ॐ शिं शिंशुमाराय नमः ॐ

अन्वाधानम् : प्रधानदेवतां शिंशुमारं ॐ शिं शिंशुमाराय नमः इति मन्त्रेण अष्टोत्तरशतवारमाज्येन, पुनः प्रधानदेवतां विष्णुं 'इदं विष्णुर्विचक्रमे' इति मन्त्रेण गुडान्न-क्षीरान्न-मुद्गान्न-गोघृतान्न-शुद्धान्नैः वटाङ्कुर-पालाशौ-दुम्बर-शतवल्ली-चिरञ्जीवीसमिद्भिश्च प्रत्येकम् अष्टोत्तरशतवारं (अष्टाविंशतिवारं वा), शेषेण स्विष्टकृतम् .... ॥

* * *

34. भाग्यसूक्तपुरश्चरणहोमः

प्रधानदेवतां लक्ष्मीनारायणम् ऐकमत्यसूक्तसम्पुटित-भाग्यसूक्तमन्त्रैः चतुर्दशावर्तनक्रमेण दशोत्तरद्विशतवारं प्रत्यृचं

बिल्वसमिदाज्यपायसद्रव्यैः (केवलपायसेन वा) शेषेण स्विष्टकृतम् .... ॥

* * *

35. वायुस्तुतिपुरश्चरणहोमः

प्रधानदेवताः नृसिंहरामकृष्णवेदव्यासान् तत्तन्मूलमन्त्रेणाष्टाष्टवारमाज्येन, पुनः प्रधानदेवतां लक्ष्मीनृसिंहं मन्युसूक्तसपत्नघ्नसूक्ताभ्यामाज्येन, बळित्थासूक्तेन हरिवायू आज्येन, पुनः पान्त्वस्मानित्यादि श्लोकद्वयेन लक्ष्मीनृसिंहं, पुनः हरिवायू वायुस्तुतिपुरश्चरणरीत्या पञ्चवारं (सप्तवारं वा) मोदक-तिल-नालिकेर-रसाल-कदली-मधु-क्षीर-गुडसंमिश्रितपरमान्नद्रव्येण पुनः खिलमन्त्रैः एकैकवारं परमान्नद्रव्येण, पुनः मुख्यप्राणमन्त्रेणाष्टवारमाज्येन, पुनः हनुमद्भीममध्वान् तत्तन्नाममन्त्रैः अष्टाष्टवारमाज्येन, शेषेण स्विष्टकृतम् .... ॥

* * *

36. विरजाहोमः

प्रधानदेवतां नारायणं मूलेनाष्टोत्तरशतवारमाज्येन पुनः परमात्मानं महानारायणोपनिषदुक्तैः एकोनविंशतिविरजामन्त्रैः प्रतिमन्त्रम् अष्टाविंशतिवारमाज्येन, शेषेण स्विष्टकृतम् ...... ॥

* * *

37.

वास्तुहोमः

(तन्त्रसारानुसारी)

अत्र प्रधानदेवतां वास्तोष्पतिं "वास्तोष्पते प्रतिजानीहि' इतिमन्त्रेण अष्टाविंशतिसङ्ख्यया आज्यद्रव्येण, 'वास्तोष्पते प्रतरणो' इति मन्त्रेण अष्टाविंशतिसङ्ख्यया तिलद्रव्येण, 'वास्तोष्पते शग्मया' इति मन्त्रेण अष्टाविंशतिसङ्ख्यया यवद्रव्येण, 'अमीवहे'ति मन्त्रेण अष्टाविंशतिसङ्ख्यया गुळूचि-द्रव्येण, 'ध्रुवा द्यौः' इति मन्त्रेण ब्रह्माणम् अष्टाविंशतिसङ्ख्यया (दधिमधुघृतानि) त्रिमधुरद्रव्येण, इन्द्रादिलोकपालकान् तत्तन्नाममन्त्रेण प्रत्येकम् अष्टाष्टवारं तिलद्रव्येण, पुनः वास्तोष्पतिं पूर्वोक्तचतुर्मन्त्रेण ब्रह्माणं च 'ध्रुवाद्यौः' इति मन्त्रेण बिल्वफलेन (बिल्वसमिद्द्रव्येण वा), पुनः ब्रह्माद्येकोन-पञ्चाशद्देवताः तत्तन्नाममन्त्रेण एकैकवारमाज्येन, शेषेण स्विष्टकृतम् .... ॥

* * *

38.

गृहवास्तुहोमः

प्रधानदेवतां वास्तोष्पतिं "वास्तोष्पते प्रतिजानीहि' इत्यादि-चतसृभिः वास्तोष्पते ध्रुवास्थूणामिति ऋचा च क्रमेण पलाश-समित्त्रिमधुरयुक्तदूर्वाज्यपायसकृष्णतिलमिश्रयवाख्यपञ्च-द्रव्यैः अष्टोत्तरशतवारम् (अष्टाविंशतिवारं वा), पुनः वास्तु-

ब्रह्मादित्रिपञ्चाशद्देवताः एकैकवारमाज्येन, शेषेण स्विष्टकृतम् ॥

* * *

39. रक्षोघ्नहोमः
(बोधायनीयः)

रक्षोघ्नहोमः कर्म । आघारवत्तन्त्रम् । पञ्चदशदारुरिध्मः अग्नीषोमावाज्यभागौ । वरदो नामाग्निः । रक्षोहाग्निर्देवता चरुर्हविः । प्रधानदेवतां रक्षोहाग्निं "रक्षोहणं वाजिनं" "विज्योतिषा' इति द्वाभ्यां पक्वम् । पुनः उपहोमश्च रक्षोघ्नसूक्तमन्त्रैः आज्येन, 'ये देवा' इति पञ्चमन्त्रैः आज्येन 'जातवेदस' इत्यादि पञ्चमन्त्रैः आज्येन, सुदर्शनमन्त्रेणाष्टोत्तर शतवारमपामार्गसमिदाज्यचर्वाज्यद्रव्यैः (अघोरास्त्रेण वा) अग्निः स्विष्टकृत् । आज्यस्य मान्त्रवार्णिक्यो देवताः ॥

* * *

40. कूश्माण्डसूक्तहोमः

आघारवत् तन्त्रम् । पञ्चदशदारुरिध्मः । अग्नीषोमावाज्य भागौ । चित्तिर्नामाग्निः । सविता देवता । चरुर्हविः । उपहोमश्च कूष्माण्डमन्त्रैराज्येन । अग्निः स्विष्टकृत् । आज्यस्य मान्त्र वार्णिक्यो देवताः ॥

* * *

41. कालमृत्युञ्जयशान्तिः

आधारवत् तन्त्रम् । वरदो नामाग्निः । अभयङ्करेन्द्रो देवता । सदूर्वासमिच्चर्वाज्यमिश्रद्रव्याणि हवींषि । अग्निः स्विष्टकृत् । आज्यस्य मान्त्रवर्णिक्यो देवताः ॥

* * *

42. महामृत्युञ्जयहोमः

कहोळ ऋषिः । दैवी गायत्री छन्दः । मृत्युञ्जयरुद्रो देवता ।

सां, सीं, सूं, सैं, सौं, सः इति षडङ्गानि ।

ध्यानम्: चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तस्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम् ।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये ॥

मन्त्रः ॐ ॐ जूं सः ॐ ॥

होममन्त्रः ॐ ॐ जूं सः ....नक्षत्रे ......राशौ जातं/जातां ....नामकं/नामिकां (साध्यनक्षत्रराशिनामग्रहणं कर्तव्यम्) पालय पालय सः जूं ॐ ॥

अन्वाधानम् प्रधानदेवतां मृत्युञ्जयरुद्रं पूर्वाज्यापराज्यसहितैः अमृत-वट-तिल-दूर्वा-पयो-घृत-पायसद्रव्यैः प्रत्येकम् अष्टोत्तरशतवारं (अष्टाविंशतिवारं वा) ...... सद्यो यक्ष्ये ॥

* * *

43. सञ्जीविनीमृत्युञ्जयहोमः

वसिष्ठ ऋषिः । अनुष्टुप् छन्दः । मृत्युञ्जयो देवता ।

ॐ हौं जूं सः हृदयाय नमः ।

ॐ भूर्भुवःस्वःशिरसे स्वाहा ।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं शिखायै वषट् ।

ॐ उर्वारुकमिव बन्धनात् कवचाय हुम् ।

ॐ मृत्योर्मुक्षीय मामृतात् नेत्रत्रयाय वौषट् ।

ॐ ॐ स्वःभुवःभूःॐ सः जूं हौं ॐ अस्त्राय फट् ॥

ध्यानम्: अरुणकमलकान्तिं स्वर्धुनीराजमानं
करकलितकपालं स्वक्षमालां दधानम् ।
कलशममृतपूर्णं शूलहस्तं ज्वलन्तं
त्रिणयनमभिवन्दे मृत्युमृत्युं महेशम् ॥

मन्त्रः ॐ हौं जूं सः ॐ भूर्भुवःस्वः ॐ त्र्यम्बकं......मामृतात्
ॐ स्वःभुवःभूः ॐ सः जूं हौं ॐ ॥

अन्वाधानम् प्रधानदेवतां सञ्जीविनीमृत्युञ्जयं अमृतवटतिल-दूर्वापयोघृतपायसाख्यसप्तद्रव्यैः प्रत्येकं चतुश्चत्वारिंश-दुत्तरशतवारं (१४४x७= १००८), शेषेण स्विष्टकृतम् .... ॥

* * *

44.

स्वयंवरपार्वतीहोमः

अज ऋषिः। त्रिष्टुप् छन्दः। स्वयंवरपार्वती देवता॥

ह्रामित्यादि षडङ्गानि।

ध्यानम्: ॐ बालार्कायुतसुप्रभां करतलैर्लोलम्बमालाकुलां
मालां सन्दधतीं मनोहरतनुं मन्दस्मितोद्यन्मुखीम्।
मन्दं मन्दमुपेयुषीं वरयितुं शम्भुं जगन्मोहिनीं
वन्दे देवमुनीन्द्रवन्दितपदामिष्टार्थदां पार्वतीम्॥

ॐ ह्रीं योगिनि योगिनि योगेश्वरि योगभयङ्करि सकलस्थावरजङ्गमस्य मुखहृदयं मम वशमाकर्षयाकर्षय स्वाहा॥

प्रधानदेवतां स्वयंवरपार्वतीं तन्मन्त्रेण बिल्वसमिदाज्यपायसद्रव्यैः (केवलपायसेन वा) अष्टोत्तरसहस्रवारं (अष्टोत्तर शतवारं वा), शेषेण स्विष्टकृतम् .... ॥

* * *

45.

वागीश्वरीहोमः

कण्व ऋषिः। विराट्छन्दः। वागीश्वरी देवता॥

वदवद, वाग्वादिनी, स्वाहा, वदवद, वाग्वादिनी, स्वाहा,

ध्यानम् : तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे।

निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै पातु वाग्देवता नः ॥

मन्त्रः ॐ वदवद वाग्वादिनी स्वाहा ॥

अन्वाधानम् : प्रधानदेवतां वागीश्वरीं मूलमन्त्रेण समिदाज्यतिलपायसाख्यचतुर्द्रव्यैः अष्टोत्तरसहस्रवारं (अष्टोत्तरशतवारं वा) शेषेण स्विष्टकृतम् .... ॥

* * *

46. तिलहोमः

प्रधानदेवतां सवितृरूपिपरमात्मानं ब्रह्मगायत्रीमन्त्रेण आज्याक्ततिलद्रव्येण अष्टोत्तरसहस्रवारं शेषेण स्विष्टकृतम् .... ॥

* * *

47. धात्रीहोमः

प्रधानदेवताः धात्र्यादिद्वाविंशतिदेवताः तत्तन्नाममन्त्रैः एकैकवारम् अपूपगुडसूपमिश्रितचरुद्रव्येण, पुनः प्रधानदेवतां दामोदरं 'संसृष्टं धनमुभयम्' इति मन्त्रेण अष्टाविंशतिवारं (अष्टोत्तरशतवारं वा) पायसद्रव्येण, पुनः "ऋषभं मा' इति सूक्तेन प्रत्यृचमेकैकवारं पायसद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

द्वाविंशतिदेवताः

1 2 3 4 5
धात्री शान्तिस्तथा कान्तिर्माया प्रकृतिरेव च ।
6 7 8 9 10
विष्णुपत्नी महालक्ष्मी रमा मा कमला तथा ॥
11 12 13 14
इन्दिरा लोकमाता च कल्याणी मङ्गला तथा ।
15 16 17 18
सावित्री च जगद्धात्री गायत्री सुधृतिस्तथा ॥
19 20 21 22
अव्यक्ता विश्वरूपा च सुरूपा ह्यब्धिसम्भवा ॥
ऋषभं मा समानानां .... । १०, १६६, १-५

* * *

48. स्वर्णकन्याविवाहहोमः

प्रधानदेवतां रुद्रं 'कद्रुद्राय' इति मन्त्रेण अष्टोत्तरशतवारम् अपामार्गसमिद्-दूर्वा-तिल-सर्पिः-पायसद्रव्यैः, पुनः प्रधानदेवतां गौरीं 'गौरीर्मिमाय' इति मन्त्रेण पूर्वोक्तद्रव्यैः अष्टोत्तरशतवारं, शेषेण स्विष्टकृतम् .... ॥

* * *

49. अर्कविवाहहोमः

प्रधानदेवताः बृहस्पतिं "सङ्गोभिराङ्गिरसो' इति मन्त्रेण, अग्निं "यस्मैत्वा कामकामय' इति मन्त्रेण, अग्निं वायुं सूर्यं प्रजापतिं च व्यस्तसमस्तव्याहृतिभिः आज्येन, शेषेण स्विष्टकृतम् ..... ॥

* * *

50. नवग्रहहोमः [१]

प्रधानदेवतामादित्यं अर्कसमिच्चर्वाज्यद्रव्यैः अष्टोत्तरशतवारमधिदेवतामग्निं प्रत्यधिदेवतां रुद्रं च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः,

पुनः प्रधानदेवतां सोमं पलाशसमिच्चर्वाज्यद्रव्यैः अष्टोत्तरशतवारम्, अधिदेवता अपः प्रत्यधिदेवतां गौरीं च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः,

पुनः प्रधानदेवतामङ्गारकं खदिरसमिच्चर्वाज्यद्रव्यैः अष्टोत्तरशतवारमधिदेवतां पृथिवीं प्रत्यधिदेवतां स्कन्दं च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः,

पुनः प्रधानदेवतां बुधमपामार्गसमिच्चर्वाज्यद्रव्यैः अष्टोत्तरशतवारमधिदेवतां विष्णुं प्रत्यधिदेवतां पुरुषं च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः,

---

१. नवग्रहप्रकरणोक्ताः मन्त्राः

पुनः प्रधानदेवतां बृहस्पतिं पिप्पलसमिच्चर्वाज्यद्रव्यैः अष्टोत्तरशतवारमधिदेवतामिन्द्रं प्रत्यधिदेवतां ब्रह्माणञ्च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः,

पुनः प्रधानदेवतां शुक्रम् उदुम्बरसमिच्चर्वाज्यद्रव्यैः अष्टोत्तर-शतवारमधिदेवतामिन्द्राणीं प्रत्यधिदेवतामिन्द्रं च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः

पुनः प्रधानदेवतां शनैश्चरं शमीसमिच्चर्वाज्यद्रव्यैः अष्टोत्तर-शतवारमधिदेवतां प्रजापतिं प्रत्यधिदेवतां यमञ्च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः,

पुनः प्रधानदेवतां राहुं दूर्वासमिच्चर्वाज्यद्रव्यैः अष्टोत्तर-तवारमधिदेवताः सर्पान् प्रत्यधिदेवतां मृत्युञ्च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः,

पुनः प्रधानदेवतां केतुं कुशसमिच्चर्वाज्यद्रव्यैः अष्टोत्तर-शतवारमधिदेवतां ब्रह्माणं प्रत्यधिदेवतां चित्रगुप्तञ्च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः,

पुनः परिवारदेवताः दुर्गां गणपतिं क्षेत्रपालं वास्तोष्पतिं त्र्यम्बकमभयङ्करेन्द्रं श्रियं च प्रत्येकं दशवारं समिच्चर्वाज्यद्रव्यैः, लोकपालान् इन्द्रमग्निं यमं निर्ऋतिं वरुणं वायुं सोममीशानञ्च प्रत्येकं दशवारं समिच्चर्वाज्यद्रव्यैः, चरुशेषेण स्विष्टकृतम् .... ||

विशेषपक्षे रव्यादीनां गुडौदन-पायसान्न-संयाव-क्षीरषाष्टिक-दध्योदन-घृतान्न-कृसरान्न-मांसान्न-चित्रान्नानि चरुस्थाने योज्यानि ।

* * *

51. कुजराहुसन्धिशान्तिहोमः

प्रधानदेवतामङ्गारकं घृततिलखदिरसमिन्मधुसर्पिर्दधि-घृताख्यसप्तद्रव्यैः अग्निर्मूर्धेति मन्त्रेणाष्टोत्तरशतवारम् अधिदेवतां पृथिवीं प्रत्यधिदेवतां स्कन्दं च तत्तन्मन्त्रेण प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः, पुनः प्रधानदेवतां राहुं दूर्वातिलसर्पिर्माषक्षीर-शर्कराख्यषड्द्रव्यैः कयानश्चित्रेति मन्त्रेण अष्टोत्तरशतवारम् अधिदेवताः सर्पान् प्रत्यधिदेवतां मृत्युञ्च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः उपदेवताः त्र्यम्बकं त्र्यम्बकमिति मन्त्रेण अष्टोत्तरशतवारं तिलद्रव्येण, मृत्युं परं मृत्यो इति मन्त्रेण अष्टोत्तरशतवारं दूर्वाद्रव्येण शेषेण स्विष्टकृतम् ....॥

* * *

52. राहुबृहस्पतिसन्धिशान्तिहोमः

प्रधानदेवतां बृहस्पतिं बृहस्पते इति मन्त्रेण अश्वत्थ-समिच्चर्वाज्यव्रीहितिलयवमिश्रचरुपरमान्नाज्यक्षीराख्यनव-द्रव्यैः अष्टोत्तरशतवारम् अधिदेवतामिन्द्रं प्रत्यधिदेवतां ब्रह्माणं च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः, पुनः मृत्युञ्जयमष्टोत्तरशतवारं

परंमृत्यो इति मन्त्रेण तिलाक्षतद्रव्येण, दुर्गां वास्तोष्पतिं विनायकं यमं मृत्युञ्च क्रमेण जातवेदसे, वास्तोष्पते, गणानां त्वा, यमाय सोमं, एतं सहस्रमयुतं इति मन्त्रैः लाजपरमान्न- दूर्वाचरुघृताख्य- पञ्चद्रव्यैः प्रत्येकमष्टाविंशतिवारं पुनः प्रधानदेवतां राहुं दूर्वाचरुघृतदूर्वातिलगोधूममाषपरमान्नाख्या- ष्टद्रव्यैः अष्टोत्तरशतवारं अधिदेवताः सर्पान् प्रत्यधिदेवतां मृत्युञ्च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः चरुशेषेण स्विष्टकृतम्...॥

* * *

53. शुक्रादित्यसन्धिशान्तिहोमः

प्रधानदेवताम् आदित्यम् आकृष्णेनेतिमन्त्रेण अष्टोत्तरशतवारं घृततिलार्कसमिद्गोधूममधुसर्पिर्दधिघृताख्याष्टद्रव्यैः अधिदेव- तामग्निं प्रत्यधिदेवतां रुद्रं च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः पुनः प्रधानदेवतां शुक्रम् अष्टोत्तरशतवारं घृततिलौदुम्बरसमित्- श्वेताक्षतमधुसर्पिर्दधिघृताख्याष्टद्रव्यैः अधिदेवताम् इन्द्राणीं प्रत्यधिदेवतामिन्द्रं च प्रत्येकं दशवारं पूर्वोक्तद्रव्यैः पुनः उपदेवतां त्र्यम्बकम् अष्टोत्तरशतवारं पलाशसमित्तिलदूर्वाद्रव्यैः शेषेण स्विष्टकृतम् ॥

* * *

54. सूर्यशान्तिः

प्रधानदेवतामादित्यम् अर्कसमिच्चर्वाज्यद्रव्यैः अष्टोत्तरशत-

वारम् (अष्टोत्तरसहस्रवारं वा) अधिदेमतामग्निं प्रत्यधिदेवतां रुद्रं च दशवारं (१०८ वा) पूर्वोक्तद्रव्यैः पुनः व्याहृतिभिः तिलव्रीहिद्रव्याभ्याम् अष्टाविंशतिवारं, दुर्गादिपरिवारदेवताः इन्द्रादिलोकपालदेवताश्च एकैकवारम् अवशिष्टसमिच्चर्वाज्य-द्रव्यैः शेषेण स्विष्टकृतम् .... ॥

* * *

55. चन्द्रशान्तिः

प्रधानदेवतां सोमं पलाशसमित्पायसाज्यतिलद्रव्यैः अष्टोत्तरशतवारम् (१००८ वा) अधिदेवताः अपः प्रत्यधिदेवतां गौरीं च दशवारं (१०८ वा) पूर्वोक्तद्रव्यैः पुनः दुर्गादिपरिवार-देवताः इन्द्रादिलोकपालदेवताश्च एकैकवारम् अवशिष्ट-समिच्चर्वाज्यद्रव्यैः शेषेण स्विष्टकृतम् .... ॥

* * *

56. कुजशान्तिः

प्रधानदेवतां कुजं खदिरसमिद्गुडौदनतिलाज्याख्यचतुर्द्रव्यैः अष्टोत्तरशतवारम् अधिदेवतां पृथिवीं प्रत्यधिदेवतां स्कन्दं च दशवारं (१००८ वा) पूर्वोक्तद्रव्यैः शेषेण स्विष्टकृतम् ..... ॥

* * *

57.

बुधशान्तिः

प्रधानदेवतां बुधम् अपामार्गसमित्तिलक्षीरान्नघृताख्य-चतुर्द्रव्यैः अष्टोत्तरशतवारम् (१००८ वा) अधिदेवतां विष्णुं प्रत्यधिदेवतां पुरुषं च दशवारं (१०८ वा) पूर्वोक्तद्रव्यैः दुर्गादिपरिवारदेवताः इन्द्रादिलोकपालदेवताश्च एकैकवारम् अवशिष्टसमिच्चर्वाज्यद्रव्यैः शेषेण स्विष्टकृतम् .... ॥

* * *

58.

बृहस्पतिशान्तिः

प्रधानदेवतां बृहस्पतिम् अश्वत्थसमिदाज्यघृतमिश्र-पायसव्रीहितिलाख्यपञ्चद्रव्यैः अष्टोत्तरशतवारम् (अष्टोत्तर-सहस्रवारं वा) अधिदेवतामिन्द्रं प्रत्यधिदेवतां ब्रह्माणञ्च प्रत्येकं दशवारं (१०८ वा) पूर्वोक्तद्रव्यैः व्याहृतिभिः अष्टाविंशतिवारं तिलद्रव्येण दुर्गादिपरिवारदेवताः इन्द्रादिलोकपालदेवताश्च एकैकवारम् अवशिष्टसमिच्चर्वाज्यद्रव्यैः शेषेण स्विष्टकृतम् .... ॥

* * *

59.

शुक्रशान्तिः

प्रधानदेवतां शुक्रम् उदुम्बरसमिच्चर्वाज्यतिलद्रव्यैः अष्टोत्तरशतवारम् (अष्टोत्तरसहस्रवारं वा) अधिदेवतामिन्द्राणीं प्रत्यधिदेवतामिन्द्रं च दशवारं (१०८ वा) पूर्वोक्तद्रव्यैः पुनः

दुर्गादिपरिवारदेवताः इन्द्रादिलोकपालदेवताश्च एकैकवारम् अवशिष्टसमिच्चर्वाज्यद्रव्यैः शेषेण स्विष्टकृतम् .... ॥

* * *

60. शनिशान्तिः

प्रधानदेवतां शनिं शमीसमित्कृसरान्नाज्यतिलद्रव्यैः अष्टोत्तरशतवारम् (अष्टोत्तरसहस्रवारं वा) अधिदेवतां प्रजापतिं प्रत्यधिदेवतां यमञ्च दशवारं (१०८ वा) पुर्वोक्तद्रव्यैः दुर्गादिपरिवारदेवताः इन्द्रादिलोकपालदेवताश्च एकैकवारम् अवशिष्टसमिच्चर्वाज्यद्रव्यैः शेषेण स्विष्टकृतम् .... ॥

* * *

61. राहुशान्तिः

प्रधानदेवतां राहुं दूर्वाग्रतिलाज्यलवणोपेतपायसद्रव्यैः अष्टोत्तरशतवारम् (अष्टोत्तरसहस्रवारं वा) अधिदेवताः सर्पान् प्रत्यधिदेवतां मृत्युञ्च दशवारं (१०८ वा) पूर्वोक्तद्रव्यैः दुर्गादिपरिवारदेवताः इन्द्रादिलोकपालदेवताश्च एकैकवारम् अवशिष्टसमिच्चर्वाज्यद्रव्यैः शेषेण स्विष्टकृतम् .... ॥

* * *

62.

केतुशान्तिः

प्रधानदेवतां केतुं कुशाग्रतिलाज्यचित्रान्नैः अष्टोत्तरशतवारम् (अष्टोत्तरसहस्रवारं वा) अधिदेवतां ब्रह्माणं प्रत्यधिदेवतां चित्रगुप्तञ्च दशवारं (१०८ वा) पूर्वोक्तद्रव्यैः दुर्गादिपरिवार-देवताः इन्द्रादिलोकपालदेवताश्च एकैकवारम् अवशिष्ट-समिच्चर्वाज्यद्रव्यैः शेषेण स्विष्टकृतम् .... ॥

* * *

63.

काळसर्पशान्तिः

नवग्रहकीर्तनान्ते, प्रधानदेवतां राहुं "कयानश्चित्र' इति मन्त्रेण अष्टोत्तरशतवारम् अधिदेवतां कालं "कार्षिरसि' इति मन्त्रेण अष्टाविंशतिवारं प्रत्यधिदेवताः सर्पान् "नमोऽस्तु सर्पेभ्य 'इति मन्त्रेण अष्टाविंशतिवारं प्रत्येकं माषान्नदूर्वातिलाज्यद्रव्यैः शेषेण स्विष्टकृतम् .... ॥

कार्षिरस्यपापां मृध्र........ ॥ १·३·१३·५ (तै. सं.)

* * *

64.

सूर्यचन्द्रग्रहणशान्तिः

प्रधानदेवतां प्रजापतिं समस्तव्याहृतिभिः अष्टोत्तरशतवारं (१००८ वारं वा) तिलद्रव्येण[१] शेषेण स्विष्टकृतम् .... ॥

---

१. अग्निवायुसूर्यप्रजापतीन् व्यस्तसमस्तव्याहृतिभिः अष्टोत्तरशतवारं तिलद्रव्येण ॥

65. गौलीपतनशान्तिः

प्रधानदेवतां सवितारं ब्रह्मगायत्रीमन्त्रेण अष्टोत्तरशतवारं पलाशसमिच्चर्वाज्यद्रव्यैः पुनः विष्णुं ब्रह्माणं रुद्रम् एकैकवारम् आज्येन चरुशेषेण स्विष्टकृतम् .... ॥

* * *

66. आश्लेषाबलिहोमः

प्रधानदेवताः सर्पान् "नमो अस्तु सर्पेभ्यो' इत्यादि सर्पमन्त्र-त्रयेण प्रत्येकम् अष्टाविंशतिवारं पालाशसमिच्चर्वाज्यद्रव्यैः पुनः सर्पमूलमन्त्रेण अष्टाविंशतिवारं समिच्चर्वाज्यद्रव्यैः बलिदेवताः एकैकवारमाज्येन शेषेण स्विष्टकृतम् .... ॥

* * *

67. आदित्यहृदयहोमः

देवभाग ऋषिः । गायत्री छन्दः । आदित्यो देवता ।

घृणिः, सूर्यः, आदित्यः, आदित्यः, सूर्यः, घृणिः इति षडङ्गानि ।

ध्यानम्: सच्छायः पद्मयुगलधरो ध्येयोऽरुणो रविः ।
सर्वव्याधिहरः श्रीदः पुष्टिदोऽयं मनुःस्मृतः ॥

मन्त्रः ॐ घृणिः सूर्य आदित्यः ॐ ॥

प्रधानदेवतामादित्यम् आदित्यहृदयश्लोकमन्त्रैः अष्टावर्तन क्रमेण अष्टचत्वारिंशदधिकद्विशतवारं (३१x८= २४८) गोधूमान्नार्कसमिदाज्यतिलाख्यचतुर्द्रव्यैः शेषेण स्विष्टकृतम् .... ॥

* * *

68.

उत्सर्जनहोमः

प्रधानदेवतां सावित्रीं, ब्रह्माणं, श्रद्धां, मेधां, प्रज्ञां, धारणां, सदसस्पतिम्, अनुमतिं, छन्दांसि ऋषीन् एता नवदेवताः नाममन्त्रेणाज्यद्रव्येण, पुनः अग्निम्, अप्तृणसूर्यान् , अग्निं, शकुन्तम्, अग्निम्, मित्रावरुणौ , अग्निम्, अपः, अग्निं, मरुतः, अग्निं, विश्वान् देवान्, अग्निम्, इन्द्रासोमौ, इन्द्रम्, अग्नामरुतः, पवमानसोमं, पवमानसोमम्, अग्निं, सञ्ज्ञानम्, एता विंशतिमण्डलदेवताः ऋग्वेदमण्डलानाम् आद्यन्तस्थैः ऋङ्मन्त्रैः, चरुद्रव्येण शेषेण स्विष्टकृतम् .... ॥

* * *

69.

उपाकर्महोमः

प्रधानदेवताः सावित्र्यादिनवदेवताः नाममन्त्रेणाज्येन, अग्न्यादिविंशतिमण्डलदेवताः ऋग्वेदमण्डलानाम् आद्यन्तस्थैः ऋङ्मन्त्रैः दधिसक्तुद्रव्येण, शेषेण स्विष्टकृतमग्निम्, इध्मसन्नहनेन रुद्रं, यज्ञोपवीतेन परमात्मानम्, अयासमग्निम् .... ॥

* * *

70. अश्वत्थप्रतिष्ठाविधिहोमः

प्रधानदेवतामश्वत्थनारायणम् "अश्वत्थेवो निषदनम्' इति मन्त्रेण पालाशसमित्तिलाज्यद्रव्यैः अष्टोत्तरशतवारं, ब्रह्मादि-मण्डलदेवता इन्द्रादिलोकपालांश्च अष्टाष्टवारम् आज्येन, शेषेण स्विष्टकृतम् .... ॥

* * *

71. ज्वरशान्तिः

कुबेर ऋषिः । अनुष्टुप् छन्दः । ज्वररूपी रुद्रो देवता ।

मन्त्रपादैः समस्तेन च पञ्चाङ्गानि ।

ध्यानम्: त्रिपाद्भस्मप्रहरणस्त्रिशिरा रक्तलोचनः ।
स मे प्रीतः सुखं दद्यात् सर्वामयपतिर्ज्वरः ॥
सततं सन्ततं चैव ज्वरमुग्रं तथैव च ।
एकाहिकं द्व्याहिकं च तृतीयादिमथापि वा ॥
ज्वरो रोगपती राजा मृत्युरोगः सनातनः ।
क्रुद्धो रोगान् ज्वरो हन्याद्रुद्रो भुवनशोभनः ॥

मन्त्रः ॐ कुबेर ते मुखं रौद्रं नन्दिन्नानन्दमावह ।
ज्वर मृत्युभयं घोरं विश नाशय मे ज्वरम् ॥

अन्वाधानम्: प्रधानदेवतां ज्वररूपिणं रुद्रं क्षीराप्लुताम्रदलैः सहस्रवारं पुनः ज्वराङ्गदेवताः सकृत्सकृदाज्येन शेषेण स्विष्टकृतम् .... ॥

अङ्गदेवताः वातज्वरः। पित्तज्वरः। श्लेष्मज्वरः। शीतज्वरः। उष्णज्वरः। द्वन्द्वज्वरः। सन्निपातज्वरः। उग्रज्वरः। गम्भीरज्वरः। सततज्वरः। सन्ततज्वरः। एकाहिकज्वरः। द्व्याहिकज्वरः। त्र्याहिकज्वरः। चातुर्थिकज्वरः। प्राकृतज्वरः। वैकृतज्वरः। आमज्वरः। निरामज्वरः। अभिघातज्वरः। अभिचारज्वरः। अभिषङ्गज्वरः। अभिशापज्वरः। एताः त्रयोविंशतिर्देवताः ॥

* * *

72. श्रीरामतारकमन्त्रहोमः

वसिष्ठ ऋषिः। गायत्री छन्दः। श्रीरामचन्द्रो देवता।

ध्यानम्: वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम्।
अग्रे वाचयति प्रभञ्जनसुते तत्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

मन्त्रः ॐ श्रीराम जय राम जयजय राम ॐ

अन्वाधानम्: प्रधानदेवतां श्रीरामचन्द्रं त्रयोदशाक्षररामतारकमन्त्रेण पायसद्रव्येण अष्टोत्तरसहस्रवारं, शेषेण स्विष्टकृतम् .... ॥

* * *

शान्तिहोमप्रकरणम्

जननकालिकदोषशान्तयः

अश्विन्यादिनक्षत्राणां देवताः मन्त्राश्च[१]

1. अश्विनी	अश्विनायज्वरीर्मधुच्छन्दा अश्विनौ गायत्री ।	१-३-१
2. भरणी	यमाय सोमं यमो यमस्त्रिष्टुप् ।	१०-१४-१३
3. कृत्तिका	अग्निस्तुविश्रवस्तमं वसूयवोऽग्निरनुष्टुप् ।	५-२५-५
4. रोहिणी	प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ।	१०-१२१-१०
5. मृगशीर्षम्	सोमो धेनुं गौतमः सोमस्त्रिष्टुप् ।	१-९१-२०
6. आर्द्रा	मृडानः कुत्सो रुद्रो जगती ।	१-११४-२
7. पुनर्वसुः	अदितिर्न इरिम्बिठोऽदितिरनुष्टुप् ।	८-१८-६
8. पुष्यः	बृहस्पते गृत्समदः बृहस्पतिस्त्रिष्टुप् ।	२-२३-१५
9. आश्लेषा	नमो अस्तु सर्पेभ्यः सर्पोऽनुष्टुप् ।	४-२-८-७ (तै.सं.)
10. मघा	आहं पितॄन् शङ्खः पितरस्त्रिष्टुप् ।	१०-१५-३
11. पूर्वफल्गुनी	अर्यमणोऽदितिः विश्वामित्रोऽर्यमा त्रिष्टुप् ।	३-५४-१८
12. उत्तरफल्गुनी	भग एव वसिष्ठो भगस्त्रिष्टुप् ।	७-४१-५
13. हस्तः	उदुत्यं काण्वः प्रस्कण्वः सूर्यो गायत्री ।	१-५०-१

---

१. एते मन्त्राः शतशान्तिप्रकाशिकातः उद्धृताः । ब्रह्मकर्मसमुच्चये तु अन्येऽपि मन्त्राः नक्षत्रदेवतामन्त्ररूपेण पठिताः ।

14. चित्रा चित्रं देवानामिति कुत्सः[१] सूर्यस्त्रिष्टुप् । १-११५-१

15. स्वाती वायवायाहि मधुच्छन्दाः वायुर्गायत्री । १-२-१

16. विशाखा इन्द्राग्नी आगतं विश्वामित्र इन्द्राग्नी गायत्री । ३-१२-१

17. अनूराधा मित्रो जनान् विश्वामित्रो मित्रस्त्रिष्टुप् । ३-५९-१

18. ज्येष्ठा इन्द्रश्रेष्ठानि गृत्समद इन्द्रस्त्रिष्टुप् । २-२१-६

19. मूलम् मोषुणो घोरः कण्वो निर्ऋतिर्गायत्री । १-३८-६

20. पूर्वाषाढा आपो हि ष्ठाः सिन्धुद्वीप आपो गायत्री । १०-९-१

21. उत्तराषाढा विश्वेदेवा ऋतावृध ऋजीषो विश्वेदेवाः गायत्री । ६-५२-१०

22. अभिजित् ब्रह्माणाते विश्वामित्रो ब्रह्मा त्रिष्टुप् । ३-३५-४

23. श्रवणम् वषट् ते विष्णो वसिष्ठो विष्णुस्त्रिष्टुप् । ७-९९-७

24. धनिष्ठा अष्टौ देवाः वसवो विष्णुर्वसवस्त्रिष्टुप् । ३-१-१८ (तै.ब्रा)

25. शतभिषा इमं मे वरुणः शुनःशेपो वरुणो गायत्री । १-२५-१९

26. पूर्वाभाद्रा समुद्रस्सिन्धुर्वसुः कण्वोऽज एकपात्त्रिष्टुप् । १०-६६-११

27. उत्तराभाद्रा उतनोनक्तं पार्थ्यस्तान्वोऽहिर्बुध्न्यः प्रस्तारपङ्क्तिः । १०-९३-५

---

१. चित्रादेवता त्वष्टा नाम सूर्यः

28. रेवती पूषागाः भरद्वाजः पूषा गायत्री । ६-५४-५

* * *

73. गोमुखप्रसवशान्तिः

अन्वाधानम्: प्रधानदेवताः[१] अपः आपो हि ष्ठेति तिसृभिः अप्सुमे इत्यनेन च अष्टाविंशतिवारं दधिमधुयुक्तघृतद्रव्येण, पुनः विष्णुं तद्विष्णोरिति मन्त्रेण अष्टाविंशतिवारं पूर्वोक्तद्रव्येण, पुनः यक्ष्माणम् अक्षीभ्याम् इति सूक्तस्य षण्मन्त्रैः प्रत्येकम् अष्टाविंशतिवारं पूर्वोक्तद्रव्येण, पुनः आदित्यादि नवग्रहान् अष्टवारं पूर्वोक्तद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्राः

१. आपो हि ष्ठा .... वर्चसा ॥ १०,९, १-३

२. अप्सुमे......... विश्वभेषजीः ॥ १,२३, २०

३. तद्विष्णोः परमं पदम् ...... चक्षुराततम् ॥ १, २२, २०

४. अक्षीभ्यां .... विवृहामि ते ॥ १०, १६३, १-६

* * *

74. मूलजननशान्तिः

अन्वाधानम्- नवग्रहकीर्तनान्ते,[२] प्रधानदेवतां निर्ऋतिं

---

१. केचित्तु सर्वत्र शान्तिहोमेषु नृसिंहमष्टाविंशतिवारमाज्येन, धन्वन्तरिमष्टाविंशतिवारं त्रिमध्वक्तदूर्वाभिः इति अन्वाधाने अधिकतया योजयन्ति ।

२. नवग्रहकीर्तनान्ते नाम→ नवग्रहान् अष्टाविंशतिवारं दशवारं वा अधिप्रत्यधिदेवताः द्विवारमेकवारं वा परिवारदेवताः लोकपालदेवताश्च द्विवारमेकवारं वा समिच्चर्वाज्यद्रव्यैर्जुहुयादिति अनुसन्धेयम् ।

प्रत्येकं १०८ वारं घृतसंमिश्रपायससमिदाज्यचर्वाहुतिभिः, अधिदेवताम् इन्द्रम् प्रत्यधिदेवताः अपश्च प्रतिद्रव्यमष्टाविंशतिवारं पूर्वोक्तद्रव्यैः, विश्वेदेवाद्याश्चतुर्विंशतिनक्षत्रदेवताः एकैकवारं नाममन्त्रेण पायसाहुतिभिः, रक्षोहणमग्निं कृणुष्वेति पञ्चदशऋग्भिः अष्टाष्टवारं विंशत्यधिकशतसङ्ख्याभिः कृसरान्नाहुतिभिः, सवितारं दुर्गां त्र्यम्बकं कवीन् दुर्गां वास्तोष्पतिम् अग्निं क्षेत्राधिपतिं मित्रावरुणौ अग्निं च एता देवताः प्रत्येकम् अष्टाष्टसङ्ख्याभिः कृसरान्नाहुतिभिः, श्रियं श्रीसूक्तस्य पञ्चदशऋग्भिः अष्टाष्टवारं प्रतिद्रव्यं विंशत्यधिकशतसङ्ख्याभिः समिदाज्यचर्वाहुतिभिः, सोमं त्रयोदशवारं पायसाहुतिभिः, रुद्रं चतुर्गृहीतेन आज्येन, अग्निं पृथिवीं महान्तं वायुमन्तरिक्षं महान्तम् आदित्यं दिवं महान्तं चन्द्रमसं नक्षत्राणि दिशो महान्तं च आज्येन, शेषेण स्विष्टकृतम् ॥

मन्त्राः १. मोषुणः परापरा .... सह ॥ १, ३८, ६

२. इन्द्रं वो विश्वतस्परि .... केवलः ॥ १, ७, १०

३. अप्सु मे .... विश्वभेषजीः ॥ १, २३, २०

४. कृणुष्वपाजः .... पातुनक्तम् ॥ ४, ४, १-१५

५. तत्सवितुः .... प्रचोदयात् ॥ ३,६२,१०

६. जातवेदसे सुनवाम ...... दुरितात्यग्निः ॥ १, ९९, १

७. त्र्यम्बकं यजामहे .... मामृतात् ॥ ७, ५९, १२

८. सीरा युञ्जन्ति .... सुम्नया ॥ १०, १०१, ४

९. तामग्निवर्णां.........सुतरसि तरसे नमः॥ (परिशिष्टम्)

१०. वास्तोष्पते प्रतिजानीहि .. शं चतुष्पदे॥ ७, ५४, १

११. अग्निं दूतं वृणीमहे ...... सुक्रतुम्॥ १, १२, १

१२. क्षेत्रस्य पतिना .... मृळातीदृशे॥ ४, ५७, १

१३. गृणाना जमदग्निना ...... ऋतावृधा॥ ३, ६२, १८

१४. अग्निं दूतं पुरोदधे ..... सादयादिह॥ ८, ४४, ३

१५. हिरण्यवर्णां हरिणीं .... पुरुषानहम्॥ १५ मन्त्राः (परिशिष्टम्)

१६. त्वं नः सोमविश्वतो .... पुरस्तात्॥ ८, ४८, १५

१७. या ते रुद्र .... जीवसे॥ ४,५,१०,१ (तै. सं)

* * *

75. प्रकारान्तरेण मूलजननशान्तिः

प्रधानदेवतां निर्ऋतिं १०८ वारं घृतसंमिश्रपायससमिदाज्यचर्वाहुतिभिः, अधिदेवताम् इन्द्रम् प्रत्यधिदेवताः अपश्च अष्टाविंशतिवारं पूर्वोक्तद्रव्यैः, शेषेण स्विष्टकृतम् ..... ॥

76. आश्लेषाजननशान्तिः

अन्वाधानम्: नवग्रहकीर्तनान्ते, प्रधानदेवताः सर्पान् 'इदँ सर्पेभ्यो' इत्यादि तैत्तिरीयवाक्याष्टकेन प्रतिद्रव्यं १०८ वारं

घृतसंमिश्रपायससमिदाज्यचर्वाहुतिभिः, अधिदेवतां बृहस्पतिं प्रत्यधिदेवताः पितॄन् प्रतिद्रव्यं २८ वारं पूर्वोक्तद्रव्यैः, [अर्यमादि चतुर्विंशतिनक्षत्रदेवताः नाममन्त्रेण एकैकवारं पायसाहुतिभिः, रक्षोहणमग्निं कृणुष्वेति पञ्चदशऋग्भिः अष्टाष्टवारं विंशत्यधिकशतसङ्ख्याभिः कृसरान्नाहुतिभिः, सवितारं दुर्गां त्र्यम्बकं कवीन् दुर्गां वास्तोष्पतिम् अग्निं क्षेत्राधिपतिं मित्रावरुणौ अग्निं च एता देवताः प्रत्येकम् अष्टाष्टसङ्ख्याभिः कृसरान्नाहुतिभिः, श्रियं श्रीसूक्तस्य पञ्चदशऋग्भिः अष्टाष्टवारं प्रतिद्रव्यं विंशत्यधिकशतसङ्ख्याभिः समिदाज्यचर्वाहुतिभिः, सोमं त्रयोदशवारं पायसाहुतिभिः, रुद्रं चतुर्गृहीतेन आज्येन, अग्निं पृथिवीं महान्तं वायुमन्तरिक्षं महान्तम् आदित्यं दिवं महान्तं चन्द्रमसं नक्षत्राणि दिशो महान्तं च आज्येन शेषेण स्विष्टकृतम् ...॥

मन्त्राः - इदँ सर्पेभ्यो.......... हवमागमिष्ठाः ॥

३,१,५ (तै.ब्रा)

ये रोचने .... सर्पेभ्यो मधुमज्जुहोमि ॥

३,१,६ (तै.ब्रा)

बृहस्पतिः प्रथमं जायमानः ....तमांसि ॥

४, ५०, ४

आहं पितॄन् .... इहागमिष्ठाः ॥ १०-१५-३

* * *

77.

प्रकारान्तरम्

प्रधानदेवताः सर्पान् 'नमो अस्तु सर्पेभ्यः' इति मन्त्रत्रयेण प्रत्येकं १०८ वारं (२८ वारं वा) समिच्चर्वाज्यद्रव्यैः, अधिदेवतां बृहस्पतिं 'बृहस्पते अतियदर्यो' इति मन्त्रेण प्रत्यधिदेवताः पितृंश्च 'आहं पितॄन्' इति मन्त्रेण दशवारं पूर्वोक्तद्रव्यैः, पुनः मृत्युञ्जयं मृत्युञ्जयमन्त्रेण १०८ वारं आज्याक्ततिलद्रव्येण, शेषेण स्विष्टकृतम्............ ॥

* * *

78.

ज्येष्ठानक्षत्रजननशान्तिः

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानम् इन्द्रं यत इन्द्रेति मन्त्रेण प्रतिद्रव्यं १०८ वारं पलाशसमिदाज्यचर्वाहुतिभिः, पुनः प्रजापतिं समस्तव्याहृतिभिः १०८ वारं तिलाहुतिभिः शेषेण स्विष्टकृतम् .... ॥

मन्त्रः - यत इन्द्र भयामहे .... जहि ॥ ८, ६१, १३.

* * *

79.

अथ कृष्णचतुर्दशीजननशान्तिः

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं रुद्रं १०८ वारम् अश्वत्थप्लक्षखदिरपलाशजातीयसमिद्भिः चर्वाहुतिभिः आज्याहुतिभिः संमिश्राभिः तिलमाषसर्षपाहुतिभिश्च, पुनः

अग्निवायुसूर्यप्रजापतीन् व्यस्तसमस्तव्याहृतिभिः २८ वारं तिलैः शेषेण स्विष्टकृतम् .... ॥

मन्त्रः - त्र्यम्बकं यजामहे .... मामृतात्। ७, ५९, १२

* * *

80. सिनीवालीकुहूजननशान्तिः

अन्वाधानम्: नवग्रहकीर्तनान्ते, अत्र प्रधानं त्र्यम्बकम् अश्वत्थप्लक्षपलाशखदिरसमिच्चर्वाज्यसर्षपतिलमाषद्रव्यैः प्रत्येकं १०८ वारं तथा च इन्द्रं पितॄंश्च प्रत्येकं २८ वारं पूर्वोक्तद्रव्यैः, पुनः रुद्रं त्र्यम्बकमन्त्रेण २८ वारं तिलाहुतिभिः, प्रजापतिं २८ वारं समस्तव्याहृत्या तिलैः, शेषेण स्विष्टकृतम् ....॥

मन्त्राः त्र्यम्बकं यजामहे .... मामृतात् ॥ ७, ५९, १२
यत इन्द्र भयामहे ..... विमृधो जहि ॥ ७, ६१, १३
ये चेह पितरो .... जुषस्व ॥ १०, १५, १३

* * *

81. दर्शजननशान्तिः

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानान् पितॄन् १०८ वारं समिच्चर्वाज्यद्रव्यैः, सोमं सूर्यं च प्रत्येकं १०८ वारं पूर्वोक्तद्रव्यैः, शेषेण स्विष्टकृतम् .... ॥

मन्त्राः - ये चेह पितरो .... जुषस्व ॥ १०, १५, १३
आप्यायस्व .... सङ्गथे ॥ ९, ३१, ४
सविता पश्चातात् ..... दीर्घमायुः ॥ १०, ३६, १४

* * *

82.

सङ्क्रमणजननशान्तिः

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं सूयम् उत्सूर्यो इति मन्त्रेण १०८ वारं समिच्चर्वाज्यद्रव्यैः, अग्निं रुद्रं च २८ वारं पूर्वोक्तद्रव्यैः, मृत्युञ्जयं तन्मन्त्रेण १०८ वारं तिलैः, शेषेण स्विष्टकृतम् .... ॥

मन्त्राः -

उत्सूर्ये बृहदर्चींष्यश्रेत् .... कर्तृभिर्भूत् ॥ ७, ६२, १
अग्निं दूतं वृणीमहे .... सुक्रतुम् ॥ १, १२, १
त्र्यम्बकं यजामहे .... मामृतात् ॥ ७, ५९, १२

* * *

83.

एकनक्षत्रजननशान्तिः

अन्वाधानम्: नवग्रहकीर्तनान्ते, अत्र प्रधानं जन्मनक्षत्रदेवतां तन्मन्त्रेण १०८ वारं समिच्चर्वाज्यद्रव्यैः शेषेण स्विष्टकृतम् .... ॥

* * *

84. ग्रहणजननशान्तिः

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं सूर्यम् अर्कसमिदाज्यचरुतिलैः १०८ वारं [चन्द्रं पलाशसमिदाज्यचरुतिलैः १०८ वारं], पुनः प्रधानदेवतां राहुं दूर्वाज्यचरुतिलैः अष्टोत्तरशतवारं, पुनः जन्मनक्षत्रदेवतां पलाशसमिच्चर्वाज्यतिलैः अष्टोत्तरशतवारं, शेषेण स्विष्टकृतम् .... ॥

मन्त्राः आकृष्णेन .... पश्यन् ॥ १, ३५, २
आप्यायस्व .... सङ्गथे ॥ ९, ३१, ४
स्वर्भानोरधो .... विन्ददत्रिः ॥ ५, ४०, ६

* * *

85. नक्षत्रगण्डान्तशान्तिः

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं सोमं आप्यायस्वेतिमन्त्रेण १०८ वारं पलाशसमिच्चर्वाज्यद्रव्यैःशेषेण स्विष्टकृतम् ....॥

* * *

86. तिथ्यादिगण्डान्तशान्तिः

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं वरुणं १०८ वारं समिच्चर्वाज्ययवतिलैः शेषेण स्विष्टकृतम् .... ॥

मन्त्रः- तत्वायामि ब्रह्मणा .... प्र मोषीः ॥ १, २४, ११

87. विषनाडीजननशान्तिः

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं रुद्रं १०८ वारं समिच्चर्वाज्यैः, यमाग्निमृत्यून् प्रत्येकं १०८ वारं पूर्वोक्तद्रव्यैः, पुनः एताः देवताः २८ वारं क्रमेण तिलद्रव्येण, शेषेण स्विष्टकृतम् ...॥

मन्त्राः कद्रुद्राय प्रचेतसे .... हृदे ॥ १, ४३, १
यमाय सोमं ....अरङ्कृतः ॥ १०, १४, १३
अग्निर्मूर्धा ...... जिन्वति ॥ ८, ४४, १६
परं मृत्यो .... वीरान् ॥ १०, १८, १

* * *

88. पञ्चमारिष्टशान्तिः

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं अभयङ्करेन्द्रं यत इन्द्र इति मन्त्रेण प्रत्येकं १०८ वारं पलाशसमिदाज्यचरुव्रीहितिलैः शेषेण स्विष्टकृतम् .... ॥

मन्त्रः- यत इन्द्र भयामहे .... जहि ॥ ८, ६१, १३

* * *

89. वर्धापनविधिः [दूर्वायुष्यचरुहोमः]

अन्वाधानम्: अत्र प्रधानं मृत्युञ्जयं सञ्जीविनीमृत्युञ्जय[१]-

---

१. सञ्जीविनीमृत्युञ्जयमन्त्रस्य षट्प्रणवघटितमृत्युञ्जयमन्त्रः इत्यपि नामान्तरमस्ति ।

मन्त्रेण[१] १०८ वारं त्रिमध्वक्तदूर्वात्रिकेण पुनः विश्वान् देवान् दशवारम्, अग्निं षोडशवारं, जातवेदसमग्निम् एकवारं चरुद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्राः - त्र्यम्बकं यजामहे .... मामृतात् ॥ ७, ८९, १२

आनो भद्राः .... जनित्वम् ॥ १, ८९, १-१०

इमं स्तोममर्हते .... उतद्यौः ॥ १, ९४, १-१६

जातवेदसे .... दुरितात्यग्निः ॥ १, ९९, १

* * *

90. दूर्वायुष्यहोमः

अन्वाधानम्: अत्र प्रधानं मृत्युञ्जयं सञ्जीविनीमृत्युञ्जय-मन्त्रेण[१] १०८ वारं त्रिमध्वक्तदूर्वात्रिकेण (दूर्वातिलैर्वा), शेषेण स्विष्टकृतम् .... ॥

* * *

वयोऽवस्थाशान्तयः

91. वैष्णवी शान्तिः

(पञ्चाशद्वर्षीयशान्तिः)

प्रधानदेवता - विष्णुः

उपदेवते - त्र्यम्बकः जन्मनक्षत्रदेवता च

होमद्रव्याणि - समिच्चर्वाज्यतिलपायसानि

---

१. शिशोः नामनक्षत्रसम्पुटितेन मृत्युञ्जयमन्त्रेण वा

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं प्रधानदेवतां विष्णुं 'वषट् ते विष्णवास' इति मन्त्रेण १०८ वारं[१] समिच्चर्वाज्यपायसैः, पुनः त्र्यम्बकं त्र्यम्बकमन्त्रेण १०८ वारं घृताक्ततिलद्रव्येण, जन्मनक्षत्रदेवतां नाममन्त्रेण २८ वारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्रः- वषट् ते विष्णवास........... स्वस्तिभिः सदा नः ॥
७, ९९, ७

* * *

92.

वारुणी शान्तिः

(पञ्चपञ्चाशद्वर्षीयशान्तिः)

प्रधानदेवता: वरुणः

उपदेवते: त्र्यम्बकः, जन्मनक्षत्रदेवता च

होमद्रव्याणि: समिच्चर्वाज्यतिलपायसानि

अन्वाधानम्: नवग्रहकीर्तनान्ते, अत्र प्रधानं प्रधानदेवतां पाशमोचनं वरुणं "ध्रुवासु त्वा सु' इति मन्त्रेण १०८ वारं समिदाज्यचरुपायसद्रव्यैः, पुनः त्र्यम्बकं त्र्यम्बकमन्त्रेण १०८ वारं घृताक्ततिलद्रव्येण, पुनः जन्मनक्षत्रदेवतां नाममन्त्रेण २८ वारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्रः- ध्रुवासु त्वा सु......... स्वस्तिभिः सदा नः ॥
७. ८८. ७

---

१. सर्वत्र प्रधानदेवतायै त्र्यम्बकाय च १००८ वारं वा ।

93.

उग्ररथशान्तिः

(षष्टितमवर्षीयशान्तिः)

प्रधानदेवता- मार्कण्डेयः

अधिदेवता- मृत्युः

प्रत्यधिदेवता- यमः

उपदेवताः- अश्वत्थामादिसप्तचिरजीविनः, इन्द्रादिदिग्देवताः, विश्वेदेवाः, अग्निः, जातवेदा अग्निः, हिरण्यदेवता, नक्षत्रदेवताः, विघटिघटिमुहूर्तप्रहरयामाहोरात्रिद्युप्रतिपदादितिथ्यभिमानिदेवताः, वारदेवताः योगदेवताः करणपक्षाभिमानिदेवताः राशिमासऋत्वभिमानिदेवताः अयनयुगवत्सरदेवताश्च ।

होमद्रव्याणि- गुडूचीसमित्परमान्नचर्वाज्यत्रिमध्वक्तदूर्वातिललाजद्रव्याणि ।

कलशसङ्ख्या- मार्कण्डेयाय एकः, अधिदेवतामृत्यवे एकः, प्रत्यधिदेवतायमाय एकः, जन्मनक्षत्रदेवतायै एकः, षष्टिसंवत्सरदेवताभ्यः षष्टिकुम्भाः एवं चतुष्षष्टिकुम्भाः ।

षोडशकुम्भपक्षे- पूर्वोक्तचतुर्देवताभ्यः चत्वारः पञ्चपञ्चसंवत्सराणां एकैकः, एवं संवत्सराणां द्वादश, मिलित्वा षोडश कुम्भाः ।

अथवा पूर्वोक्तचतुर्देवताभ्यः चत्वारः कुम्भाः, षष्टिसंवत्स-

राणाम् एकः, आहत्य 'पञ्च', तदशक्तौ एकस्मिन्कलशे सर्वदेवतावाहानम् । इति कलशसङ्ख्याक्रमः ।

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं मार्कण्डेयं वेदोक्तेन 'न सीमदेव ... ' इति मन्त्रेण गुडूचीसमित्परमान्न-द्रव्यैः २८ वारं, पुनः मार्कण्डेयं मार्कण्डेयेति श्लोकमन्त्रेण १०८ वारं गुडूचीसमित्परमान्नाज्यैः, अधिदेवतां मृत्युं प्रत्यधिदेवतां यमं च तत्तद्दमन्त्रेण पूर्वोक्तद्रव्यैः प्रत्येकं दशवारं, पुनः यजमानजन्मनक्षत्रदेवतां तन्मन्त्रेण १०८ वारं गुडूचीसमित्परमान्नाज्यैः, पुनः त्र्यम्बकं षट्प्रणवघटित-त्र्यम्बकमन्त्रेण १०८ वारं त्रिमध्वक्तदूर्वाभिस्तिलैश्च, पुनः अश्वत्थामादिसप्तचिरजीविनः वेदोक्तमन्त्रेण वा तत्तच्-श्लोकमन्त्रेण वा तन्नाममन्त्रेण वा प्रत्येकं दशवारं समिच्चर्वाज्यैः, इन्द्रादिलोकपालान् तत्तन्मन्त्रेण नाममन्त्रेण वा प्रत्येकं दशवारं समिच्चर्वाज्यैः, आनो भद्रमिति दशभिः विश्वान् देवान् चरुणा, इमं स्तोममिति षोडशभिः अग्निं, जातवेदसमग्निं च एकवारं चरुणा, पुनः आयुष्यं वर्चस्यमिति दशभिर्मन्त्रैः हिरण्यं लाजद्रव्येण, पुनः अश्विन्यादि-नक्षत्रदेवताः विघटिघटिमुहूर्तप्रहरयामाहोरात्रिद्युप्रति-पदादितिथ्यभिमानिदेवताः, वारदेवताः, योगदेवताः, करणदेवताः, पक्षाभिमानिदेवते, राशिदेवताः, मासदेवताः, ऋत्वभिमानिदेवताः, अयनदेवते, चतुर्युगदेवताः, षष्टि-वत्सरदेवताश्च एकैकवारमाज्येन, शेषेण स्विष्टकृतम् ..... ॥

मन्त्राः - न सीमदेव .... युयोज ते ॥ ८, ७०, ७

आ नो भद्राः क्रतवो .... जनित्वम् ॥ १, ८९, १-१०

इमं स्तोममर्हते .... उत द्यौः ॥ १, ९४, १-१६

जातवेदसे .... दुरितात्यग्निः ॥ १, ९९, १

आयुष्यं वर्चस्यं .... समिधं कुरु ॥ (परिशिष्टम्)

मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरारोग्यमैश्वर्यं देहि मे मुनिपुङ्गव ॥
अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः ।
कृपः परशुरामश्च सप्तैते चिरजीविनः ॥

* * *

94. प्रकारान्तरेण अन्वाधानम्

नवग्रहकीर्तनान्ते प्रधानदेवं मार्कण्डेयं श्लोकमन्त्रेण समिदाज्यचरुदूर्वापायसैः प्रतिद्रव्यम् १०८ वारं, त्र्यम्बकं त्र्यम्बकमन्त्रेण दूर्वातिलैः प्रतिद्रव्यम् १०८ वारं, पुनः अश्वत्थामादिसप्तचिरजीविनः लाजद्रव्येण प्रत्येकं २८ वारं, चरुशेषेण स्विष्टकृतम् .... ॥

* * *

95.

माहारथी शान्तिः

(पञ्चषष्टितमवर्षीयशान्तिः)

प्रधानदेवता- मृत्युञ्जयमहारथः

उपदेवते- त्र्यम्बकः यजमाननक्षत्रदेवता च ।

होमद्रव्याणि- समिदाज्यचरुपायसघृताक्ततिलाः ।

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं मृत्युञ्जयमहारथं 'मा नो महान्तम्' इति मन्त्रेण १०८ वारं प्रत्येकं समिदाज्यचरुपायसद्रव्यैः, पुनः त्र्यम्बकं त्र्यम्बकमन्त्रेण १०८ वारं घृताक्ततिलद्रव्येण, पुनः नक्षत्रदेवतां नाममन्त्रेण २८ वारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्राः- मा नो महान्तमुत मानो.... रीरिषः ॥ १, ११४, ७

* * *

96.

भैमरथी शान्तिः

(सप्ततितमवर्षीयशान्तिः)

प्रधानदेवता- रुद्रः

अधिदेवता- ब्रह्मा

प्रत्यधिदेवता- विष्णुः

उपदेवता- यजमानजन्मनक्षत्रदेवता

होमद्रव्याणि: समित्परमान्नाज्यत्रिमध्वक्तदूर्वातिलाः

अन्वाधानम् नवग्रहकीर्तनान्ते, पुनरत्र प्रधानं भीमरथं रुद्रं

'स्तुहिश्रुतम्' इति मन्त्रेण १०८ वारं पलाशसमित्परमान्नाज्यैः अधिदेवतां ब्रह्माणं प्रत्यधिदेवतां विष्णुं च २८ वारं पूर्वोक्तद्रव्यैः, पुनः त्र्यम्बकं सञ्जीविनीमृत्युञ्जयमन्त्रेण त्रिमध्वक्तदूर्वातिलैः प्रत्येकं १०८ वारं ,यजमाननक्षत्रदेवतां २८ वारम् आज्येन, शेषेण स्विष्टकृतम् .... ||

मन्त्राः - स्तुहि श्रुतं .... सेनाः || २, ३३, ११
ब्रह्मणा ते ब्रह्मयुजा .... सोमम् || ३, ३५, ४
इदं विष्णुः .... पांसुरे || १, २२, १७

* * *

97. ऐन्द्री शान्तिः

(पञ्चसप्ततितमवर्षीयशान्तिः)

प्रधानदेवता - इन्द्रः

उपदेवताः - सहस्राक्षादयः [सहस्राक्षः, शतक्रतुः,वज्रपाणिः, पुरन्दरः, अभयङ्करः, शचीपतिः, स्वर्गाधिपः, इन्द्रः] यजमानजन्मनक्षत्रदेवता त्र्यम्बकश्च ||

होमद्रव्याणि - समिदाज्यचरुपायसतिलाः

अन्वाधानम् - नवग्रहकीर्तनान्ते, अत्र प्रधानम् इन्द्रं "आतू न इन्द्रकौशिक" मन्त्रेण समिदाज्यचरुपायसद्रव्यैः प्रतिद्रव्यं १०८ वारं, पुनः त्र्यम्बकं त्र्यम्बकेति मन्त्रेण घृताक्ततिलद्रव्येण १०८ वारं, जन्मनक्षत्रदेवतां नाममन्त्रेण २८ वारं

सहस्राक्षादिपरिवारदेवताः नाममन्त्रेण घृताक्ततिलद्रव्येण प्रत्येकम् अष्टाष्टवारं, शेषेण स्विष्टकृतम् .... ॥

मन्त्राः - आतू न इन्द्रकौशिक........ ऋषिम् ॥ १, १०, ११
त्र्यम्बकं .... मामृतात् ॥ ७, ५९, १२

* * *

98.

विजयरथशान्तिः

(अष्टसप्ततितमवर्षीयशान्तिः)

प्रधानदेवता - विजयरथाख्यमृत्युञ्जयः

उपदेवताः - सहस्राक्षादयः मार्कण्डेयश्च ।

अन्वाधानम् - नवग्रहकीर्तनान्ते, प्रधानदेवतां विजयरथाख्य-मृत्युञ्जयं "परं मृत्यो" इत्यादिचतुर्भिर्मन्त्रैः अमृतबिल्व-वटसमित्पायसाज्यद्रव्यैः प्रत्येकं १०८ वारं, मार्कण्डेयं श्लोकमन्त्रेण समिच्चर्वाज्यद्रव्यैः २८ वारम्, इन्द्रं सहस्राक्षादि-नाममन्त्रैः प्रत्येकमष्टवारं परमान्नद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्रः - परं मृत्यो .... पर्वतेन ॥ १०, १८, १-४

* * *

99. सहस्रचन्द्रदर्शनशान्तिः

(अशीतितमवर्षीयशान्तिः)

प्रधानदेवता- सहस्रसङ्ख्याकदर्शनगुणविशिष्टचन्द्रः

अधिदेवता- त्र्यम्बकः

प्रत्यधिदेवता- कालस्वरूपसूर्यः

उपदेवते- ब्रह्मावरुणौ

द्रव्याणि- समित्परमान्नाज्यानि

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं चन्द्रं 'नवो नवो' इति मन्त्रेण समित्परमान्नाज्यैः १०८ वारम्, अधिदेवतां त्र्यम्बकं "त्र्यम्बकम्' इति मन्त्रेण प्रत्यधिदेवतां सूर्यं 'आ कृष्णेन' इति मन्त्रेण च २८ वारं पूर्वोक्तद्रव्यैः, उपदेवते ब्रह्माणं वरुणं च २८ वारं तत्तन्मन्त्रेण पूर्वोक्तद्रव्यैः, जन्मनक्षत्रदेवतां नाममन्त्रेण २८ वारम् आज्येन, शेषेण स्विष्टकृतम् .... ॥

मन्त्राः- नवो नवो भवति .... दीर्घमायुः ॥१०, ८५, १९

त्र्यम्बकं यजामहे.............. मामृतात् ॥ ७.५९.१२

आ कृष्णेन रजसा .... पश्यन् ॥ १, ३५, २

ब्रह्मणा ते .... सोमम् ॥ ३, ३५, ४

तत्त्वायामि .... प्रमोषीः ॥ १, २४, ११

* * *

100.

रौद्री शान्तिः

(पञ्चाशीतितमवर्षीयशान्तिः)

प्रधानदेवता- मृत्युञ्जयरुद्रः

उपदेवते- त्र्यम्बकः यजमाननक्षत्रदेवता च

द्रव्याणि- समिदाज्यचरुपायसतिलाः

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं रुद्रं मानस्तोकेति मन्त्रेण समिदाज्यचरुपायसैः १०८ वारं, पुनः त्र्यम्बकं त्र्यम्बकमन्त्रेण घृताक्ततिलद्रव्येण १०८ वारं, पुनः जन्म-नक्षत्रदेवतां २८ वारमाज्येन, शेषेण स्विष्टकृतम् ... ॥

मन्त्रः- मा न स्तोके तनये .... हवामहे ॥ १, ११४, ८

* * *

101.

सौरी शान्तिः

(नवतितमवर्षीयशान्तिः)

प्रधानदेवता- सूर्यः

उपदेवते- त्र्यम्बकः यजमाननक्षत्रदेवता च

द्रव्याणि- समिदाज्यचरुपायसतिलाः

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं सूर्यं 'तच्चक्षुर्देव-हितम्' इति मन्त्रेण समिदाज्यचरुपायसद्रव्यैः प्रतिद्रव्यं १०८ वारं, त्र्यम्बकं त्र्यम्बकमन्त्रेण घृताक्ततिलैः १०८ वारं, जन्मनक्षत्रदेवतां २८ वारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्रः- तच्चक्षुः ...... शतम् ॥ ७, ६६, १६

102.

त्र्यम्बकमृत्युञ्जयशान्तिः

(पञ्चनवतितमवर्षीयशान्तिः)

प्रधानदेवता- मृत्युञ्जयरुद्रः

उपदेवता- यजमानजन्मनक्षत्रदेवता

द्रव्याणि- समिदाज्यचरुपायसानि

अन्वाधानम्- नवग्रहकीर्तनान्ते, अत्र प्रधानं मृत्युञ्जयरुद्रं व्याहृतिसम्पुटितत्र्यम्बकमन्त्रेण समिदाज्यचरुपायसैः प्रतिद्रव्यं १०८ वारं, नक्षत्रदेवतां २८ वारमाज्येन, शेषेण स्विष्टकृतम् .... ॥

मन्त्रः- ॐ भूर्भुवःस्वः त्र्यम्बकं .... मामृतात् स्वःभुवः भूः ॐ ॥७, ५९, १२

* * *

103.

महामृत्युञ्जयशान्तिः

(शतमानशान्तिः)

प्रधानदेवता- महामृत्युञ्जयः

उपदेवताः- सूर्यः, जन्मनक्षत्रदेवता

परिवारदेवताः- विश्वेश्वरः, महादेवः, विरूपाक्षः, सदाशिवः, त्र्यम्बकः, त्रिपुरुषः, रुद्रः, त्रिपुरान्तकः, सर्वेश्वरः, शङ्करः, विश्वरूपः ।

द्रव्याणि- समित्परमान्नाज्यचरुतिलाः

अन्वाधानम् नवग्रहकीर्तनान्ते, अत्र प्रधानं महामृत्युञ्जयरुद्रं समिदाज्यचरुपायसैः षट्प्रणवघटितमृत्युञ्जयमन्त्रेण १०८ वारं, विश्वेश्वराद्येकादशरुद्रपरिवारदेवताः नाममन्त्रेण केवलपायसेन प्रत्येकमष्टाष्टवारं, सूर्यम् 'उद्यन्नद्य' इति मन्त्रेण १०८ वारं तिलैः, पुनः जन्मनक्षत्रदेवतां २८ वारमाज्येन शेषेण स्विष्टकृतम् .... ॥

मन्त्रः - ॐ हौं जूं सः ॐ भूर्भुवःस्वः ॐ त्र्यम्बकं......मामृतात् ॐ स्वःभुवःभूः ॐ सः जूं हौं ॐ ॥

ॐ उद्यन्नद्य मित्रमह ... नाशय ॥ १, ५०, ११

* * *

व्रतोद्यापनहोमप्रकरणम्

104. सङ्कष्टचतुर्थीव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां गणपतिं 'गणानां त्वा' इति मन्त्रेण दूर्वारक्ताक्षताज्यमोदकपायसाख्यपञ्चद्रव्यैः (केवलमोदकैर्वा) प्रत्येकं १०८ वारं, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्रः - गणानां त्वा.......... । २.२३.१

* * *

105. ऋषिपञ्चमीव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवताः अरुन्धतीसहितकश्यपादिसप्तर्षीन् तिलव्रीहियवाज्यद्रव्यैः प्रत्येकं १०८ वारं (२८ वारं वा), ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

(कश्यपात्रिभरद्वाजविश्वामित्रगौतमजमदग्निवसिष्ठाः अरुन्धती च)

मन्त्राः - १. ऋषे मन्त्रकृतां....... । ९, ११४, २

२. अत्रिर्यद्वा....... । ५, ७८, ४

३. एवा नः स्पृधः........ । ६, २५, ९

४. प्रसूतो भक्षमकरं .... । १०, १६७, ४

५. अभि त्वा गोतमा...... । १, ७८, १

६. गृणाना जमदग्निना....... । ३, ६२, १८

७. उतासि मैत्रावरुणो......... । ७, ३३, ११

८. अत्रेर्यथाऽनुसूया......... । (परिशिष्टम्)

* * *

106. मङ्गलगौरीव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां गौरीं 'गौरीर्मिमाय' इति मन्त्रेण घृततिलाक्षतबिल्वदलाख्यचतुर्द्रव्यैः प्रत्येकं १०८ वारं, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्रः गौरीर्मिमाय...............॥ १,१६४, ४१

* * *

107. शिवरात्रिव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवताम् उमामहेश्वरं 'त्र्यम्बकम्' इति मन्त्रेण पायसबिल्वपत्रतिलदूर्वाघृताख्यपञ्चद्रव्यैः प्रत्येकं १०८ वारं, द्वादशकलशदेवताः अष्टाष्टवारं पूर्वोक्तद्रव्यैः, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्रः त्र्यम्बकं यजामहे .... ॥ ७,५९,१२

विशेषः द्वादशकलशाराधनं कार्यम्

प्राच्याम्- महेशः, अघोरः, पशुपतिः

दक्षिणस्याम्- पञ्चवक्त्रः, उग्रः, रुद्रः

पश्चिमायाम्- भवः, शर्वः, शम्भुः

उत्तरस्यां- शिवः, भीमः, भीमपराक्रमः

* * *

108. सोमवत्यमावास्याव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवताम् अश्वत्थरूपिनारायणम् 'इदं विष्णुः' इति मन्त्रेण अश्वत्थसमित्पायसतिलद्रव्यैः प्रत्येकं १०८ वारं, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्रः - इदं विष्णुः............॥ १,२२,१७

* * *

109. गोपद्मव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां गोपालं 'त्रीणि पदा' इति मन्त्रेण अश्वत्थसमिद्भिः, 'अतो देवा' इति मन्त्रेण तिलैः, 'इदं विष्णुः' इति मन्त्रेण पायसेन, 'विष्णोर्नुकम्' इति मन्त्रेण आज्येन, 'तत्सवितुः' इति मन्त्रेण यवैः प्रत्येकं १०८ वारं, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्राः त्रीणि पदा... । १, २२, १८

अतो देवा.... । १, २२, १६

इदं विष्णुः..... । १, २२, १७

विष्णोर्नु कं...... । १, १५४, १

तत्सवितुः...... । ३, ६२, १०

* * *

110. अनन्तव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवताम् अनन्तम् 'इदं विष्णुः' इति मन्त्रेण अश्वत्थसमित्तिलव्रीहियवघृतपायसाख्यषड्द्रव्यैः प्रत्येकं १०८ वारं, पीठदेवताः आवरणदेवताश्च एकैकवारम् आज्येन (पायसाज्याभ्यां वा), ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्रः - इदं विष्णुः.............. ॥ १,२२,१७

* * *

111. श्रीविष्णुलक्षपूजाव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां लक्ष्मीनारायणम् 'ॐ नमो नारायणाय' इति मन्त्रेण मधुलाजमिश्रिततिल-पायसचरु-घृताख्यचतुर्द्रव्यैः प्रत्येकं १०८ वारं (१००८ वारं वा), ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

* * *

112. श्रीविष्णुलक्षप्रदक्षिणव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां विष्णुं विष्णुगायत्रीमन्त्रेण चर्वाज्यद्रव्याभ्यां प्रत्येकं १०८ वारं (१००८ वारं वा), ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

* * *

113. श्रीविष्णुलक्षपुष्पार्चनव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां विष्णुम् 'इदं विष्णुः' इति मन्त्रेण तिलाज्यपायसद्रव्यैः प्रत्येकं १०८ वारं (१००८ वारं वा), ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

* * *

114. श्रीविष्णुलक्षदीपप्रज्वलनव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां विष्णुम् 'इदं दिष्णुः' इति मन्त्रेण घृताक्ततिलद्रव्येण १०८ वारं (१००८ वारं वा), ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्रः - इदं विष्णुः....................॥ १,२२,१७

* * *

115. श्रीविष्णुलक्षवर्तिव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां विष्णुम् 'अग्ने नय' इति मन्त्रेण पायसेन, 'इदं विष्णुः' इति मन्त्रेण पलाशसमिद्भिः, विष्णुगायत्र्या घृतेन च प्रत्येकं १०८ वारं (१००८ वारं वा), उपदेवतां ब्रह्माणं 'ब्रह्म जज्ञानं' इति मन्त्रेण तिलद्रव्येण २८ वारम्, उपदेवतां शम्भुं 'नमः शम्भवे च मयोभवे च' इति मन्त्रेण तिलद्रव्येण २८ वारं, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्राः - अग्ने नय....... ॥ १, १८९, १
इदं विष्णुः........... ॥ १, २२, १७
ब्रह्म जज्ञानं..............॥ ४,२,८,४ (तै.सं)
नमः शम्भवे च मयोभवे च......॥ ४,५,८,१ (तै.सं)

* * *

116. श्रीरामनामलेखनव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां श्रीरामं 'रां रामाय नमः' इति मन्त्रेण लेखनदशांशेन आज्येन (पायसेन वा), पुनः परिवारदेवताः सीतालक्ष्मणहनूमतः नाममन्त्रेण प्रत्येकम् एकैकवारम् आज्येन, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

* * *

117. श्रीरुद्रलक्षवर्तिव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां रुद्रं 'कद्रुद्राय' इति मन्त्रेण घृतपायसबिल्वपत्रैः प्रत्येकं १०८ वारं (१००८ वारं वा), ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ||

मन्त्रः - कद्रुद्राय.......... || १,४३,१

* * *

118. भीष्मपञ्चकव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां विष्णुम् 'ॐ विं विष्णवे नमः' इति मन्त्रेण घृताक्ततिलव्रीहिद्रव्याभ्यां प्रत्येकं १०८ वारं, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ||

* * *

119. चान्द्रायणव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां नारायणं 'नारायण परो ध्याता' इति मन्त्रेण समित्पायसतिलाज्यद्रव्यैः १०८ वारम्, अधिदेवतां लक्ष्मीं 'सक्तुमिव' इति मन्त्रेण प्रत्यधिदेवतां सूर्यम् 'आ कृष्णेन' इति मन्त्रेण च २८ वारं पूर्वोक्तद्रव्यैः, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ||

मन्त्राः - नारायण परो ध्याता...............॥(तै.आ.)

सक्तुमिव .... ॥ १०,७१,२

आ कृष्णेन................... ॥ १,३५,२

* * *

120. अखण्डव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां विष्णुं घृताक्तचरुणा पुरुषसूक्तेन प्रत्यृचम् एकैकवारम्, 'इदं विष्णुः' इति मन्त्रेण घृताप्लुत-पलाशसमिद्भिः १०८ वारं, पुनः प्रजापतिं समस्तव्याहृत्या घृताक्ततिलैः १०१ वारं, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्रः - इदं विष्णुः.................॥ १,२२,१७

* * *

121. श्रीविष्णुपञ्चकव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां विष्णुम् 'इदं विष्णुः' इति मन्त्रेण घृताक्तापूपपायसघृतपञ्चामृततिलाख्यपञ्चद्रव्यैः प्रत्येकं १०८ वारं, श्रवणदेवताः घृताक्तापूपेन, शुक्लैकादशीदेवताः गुडपायसेन, पूर्णिमादेवताः घृतपायसाभ्यां, कृष्णैकादशीदेवताः पञ्चामृत-तिलौदनैः, अमादेवताः तिलमुद्गगुडौदनैः प्रत्येकं प्रतिद्रव्यम् एकैकवारं नाममन्त्रेण, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

पञ्चकलशाः - १. श्रवणर्क्षकलशे- ॐ त्रीणि पदा विचक्रमे.. । १, २२, १८

२. शुक्लैकादशीकलशे- ॐ तद्विष्णोः परमं... । १, २२, २०

३. पूर्णिमाकलशे- ॐ तद्विप्रासो....... । १, २२, २१

४. कृष्णैकादशीकलशे- ॐ अतो देवा अवन्तु....... । १, २२, १६

५. अमाकलशे- ॐ इदं विष्णुर्विचक्रमे...... । १, २२, १७

१. श्रवणदेवताः-गोवर्धनधरः अनन्तः पुण्डरीकाक्षः, नित्यः, वेदगर्भः, यज्ञः, पुरुषः, सुब्रह्मण्यः, जयः, शौरिः, वैकुण्ठः, गरुडध्वजः ।

२. शुक्लैकादशीदेवताः-केशवः, नारायणः, माधवः, गोविन्दः, विष्णुः, मधुसूदनः, त्रिविक्रमः, वामनः, श्रीधरः, हृषीकेशः, पद्मनाभः, दामोदरः ।

३. पूर्णिमादेवताः- विधुः, शशीः, शशाङ्कः, चन्द्रः, सोमः, उडुपः, मनोहरः, अमृतः, पावनः, हिमकृत्, निशाकरः, आप्यायनः ।

४. कृष्णैकादशीदेवताः- सङ्कर्षणः, वासुदेवः, प्रद्युम्नः, अनिरुद्धः, पुरुषोत्तमः, अधोक्षजः, नारसिंहः, अच्युतः, जनार्दनः, उपेन्द्रः, हरिः, कृष्णः ।

५. अमादेवताः- महीधरः, जगन्नाथः, देवेन्द्रः, देवकीसुतः,

चतुर्भुजः, गदापाणिः, सुरेशः, सुलोचनः, चार्वङ्गः, चक्रपाणिः, सुमित्रः, असुरान्तकः ।

* * *

122. श्रीसत्यनारायणव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां सत्यनारायणं 'तद्विष्णोः परमम्' इति मन्त्रेण पायसपलाशसमिदाज्यद्रव्यैः प्रत्येकं १०८ वारं, पुनः प्रधानदेवतां महालक्ष्मीं 'सक्तुमिव' इति मन्त्रेण २८ वारं पूर्वोक्तद्रव्येण, उपदेवतां गौरीं 'गौरीर्मिमाय' इति मन्त्रेण, गणपतिं 'गणानां त्वा' इति मन्त्रेण, क्षेत्रपालं 'क्षेत्रस्य पतिना' इति मन्त्रेण च प्रत्येकम् अष्टवारं पूर्वोक्तद्रव्यैः, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्राः -	तद्विष्णोः परमं............. ॥	१,२२,२०
	सक्तुमिव................ ॥	१०,७१,२
	गौरीर्मिमाय..................॥	१,१६४,४१
	गणानां त्वा.................. ॥	२.२३.१
	क्षेत्रस्य पतिना.............. ॥	४.५७.१

* * *

123. धारणपारणव्रतोद्यापनम्

अत्र प्रधानं प्रधानदेवतां लक्ष्मीनारायणं 'निषुसीद गणपते' इति मन्त्रेण तिलौदनेन, 'अरायि काणे' इति मन्त्रेण घृतौदनेन, अष्टाक्षरेण पायसेन प्रत्येकं १०८ वारं, ब्रह्मादिमण्डलदेवताः एकैकवारम् आज्यद्रव्येण, शेषेण स्विष्टकृतम् .... ॥

मन्त्रौ- निषुसीद गणपते................॥ १०,११२,९

अरायि काणे.................... ॥ १०,१५५,१

* * *

आगमोक्तहोमप्रकरणम्

आगमोक्तहोमसामान्यविधिः

स्वगृह्योक्तविधिना अग्निं प्रतिष्ठाप्य तत्तद्देवोक्तविधिना अग्निं जनयेत्। पुनः अन्वाधानादि कृत्वा चक्षुष्यन्ते पीठं सम्पूज्य मूलेन देवमावाह्य सम्पूजयेत् । ततः प्रणवव्याहृतिपीठमन्त्रैः सकृत्-सकृदाज्यं हुत्वा पक्कमन्त्रेण पक्कं जुहुयात् । ततः पूजामन्त्रैः आज्यं जुहुयात् । पुनः द्रव्याणि अन्तरान्तरा पूर्णाहुतिसहितं होमयेत् । स्विष्टकृदादि होमशेषं समापयेत् ।

पक्कमन्त्राः - शिवे - तत्पुरुषाय......... प्रचोदयात् ।

दुर्गायाम् - जातवेदसे .... दुरितात्यग्निः ।

विष्णौ - नारायणाय विद्महे वासुदेवाय धीमहे ।
तन्नो विष्णुः प्रचोदयात् ।

हरिहरे - शङ्कराय विद्महे नारायणाय धीमहे । तन्नः पुरुषः प्रचोदयात् ।

गुहे - शक्तिहस्ताय विद्महे षडाननाय धीमहे । तन्नः स्कन्दः प्रचोदयात् ।

गणपतौ - विनायकाय विद्महे गजवक्त्राय धीमहे। तन्नो विघ्नः प्रचोदयात् ।

शास्तरि - ॐ भूर्भुवःस्वः भूताधिपाय विद्महे भवपुत्राय धीमहे । तन्नः शास्ता प्रचोदयात् ।

पूर्णाहुतिमन्त्राः -

शिवे - ॐ आं ईं ऊं व्योमव्यापिने ॐ वौषट् ।

विष्णौ - ॐ नमो भगवते वासुदेवाय वौषट् ।

शास्तरि - ॐ भूर्भुवःस्वः वौषट् ।

शङ्करनारायणे - ॐ हूं शिवनारायणाय नमः वौषट् ।

सुब्रह्मण्ये - ॐ वचद्भुवे नमः वौषट् ।

गणपतौ - ॐ गं गणपतये नमः वौषट् ।

दुर्गायाम् - ॐ ह्रीं दुं दुर्गायै नमः वौषट् ।

द्रव्यभेदे मन्त्रभेदे अवसाने च पूर्णाहुतिं कुर्यात् ॥

अतः आगमोक्तसर्वहोमेष्वपि अन्वाधाने एषः अंशः समानो भवति ।

अन्वाधानम्- अस्मिन् जनितेऽग्नौ जातवेदसमग्निमित्यादि चक्षुष्यन्तमुक्त्वा

अत्र प्रधानं प्रधानदेवतां .... प्रणवव्याहृतिपीठमन्त्रैः सकृत्सकृदाज्येन .... पक्वमन्त्रेण पक्वं पूजामन्त्रैः एकैकवारमाज्येन ,

पुनः अत्र प्रधानं प्रधानदेवतां........... (वक्ष्यमाणान्वाधानस्य योजना कर्तव्या ।)

अन्ते अन्तरान्तरा पूर्णासहितं, चरुशेषेण स्विष्टकृतम्...... ॥

शान्तिप्रायश्चित्तादिहोमेषु होमस्य दक्षिणे परिधिस्थापनात् पूर्वं कलशं सम्पूज्य होमान्ते तेन कलशेन देवम् अभिषिञ्चेत् ।

124.

भूशुद्धिहोमः

खननं हरणं दाहः पूरणं गोनिवासनम् ।
विप्रोच्छिष्टं पञ्चगव्यमित्येताः स्थानशुद्धयः ॥

अत्र दाहकाले भूशुद्धिहोमं कुर्यात् ।

गर्ते अग्निकार्यविधिनाग्निं संस्थाप्य अस्त्रमन्त्रेण चतुर्विंशतिवारमाज्यं हुत्वा ततः प्रत्येकं द्वादशवारम् 'ॐ लं स्वाहा' इति तिलान् 'ॐ वं स्वाहा' इति दूर्वाः 'ॐ रं स्वाहा' इत्यक्षतान् 'ॐ यं स्वाहा' इत्याज्यम् 'ॐ हं स्वहा' इति क्षौद्रं च होमयेत् । पुनः व्याहृतिभिः एकैकशः हुत्वा होमं विधिना समापयेत् ॥

* * *

125.

रक्षोघ्नहोमः

आग्नेये चतुरश्रकुण्डे रक्षोघ्नहोमं विदधीत ॥ (स्वगृह्योक्ततन्त्रेण वा) याजुषेण अग्निमुखं विधाय-

"रक्षोहणं वाजिनम्', "विज्योतिषा' इति द्वाभ्यां पक्षं कृणुष्वेत्यादिभिः अष्टादशभिः[१] "ये देवा' इत्यादिपञ्चभिः जातवेदादिपञ्चभिः (हरिहरे पञ्चतत्वैः च) भूरादिव्याहृतिभिश्च एकैकवारमाज्येन, पुनः अस्त्रमन्त्रेण अष्टोत्तरशतवारं प्रत्येकम् अपामार्गसमिदाज्यचर्वाज्यद्रव्यैः, चरुशेषेण स्विष्टकृतम्..... ॥

होमान्ते अपामार्गसम्मिलितेन भस्मना प्रणीताम्भसा च युक्तेन

---

१. सर्वत्र वेदमन्त्रैर्होमे तदुक्तदेवतायै उद्देशत्यागः ।

शतावृत्त्या अस्त्रजपमहितेन सम्पातेन दर्भपलाशापामार्गाश्वत्थशाखाभिः कृणुष्वादिहोममन्त्रं जपन् देवगृहं सर्वतः उक्षेत् ।

अस्त्रमन्त्राः

चक्रं चक्रिनिसुम्भजिद्धरिहरेऽघोरं गणेशेश्वरे
स्याद् वा पाशुपतं तदन्वितरथाङ्गं वास्त्रमीशाच्युते ।
ज्वालामालिनि हुं ज्वलादिघृणि हुंफट् चेति सङ्कीर्तिते
अस्त्रे शक्तिधरार्थयोः स्वलिपिक्लृप्ताङ्गे तथाङ्गाक्षरे ॥

विष्णौ दुर्गायां शङ्करनारायणे च सुदर्शनास्त्रं शिवे गणपतौ च अघोरं पाशुपतं (ॐ श्लीं पशु हुं फट्) वा अस्त्रम् ॥

शङ्करनारायणे पाशुपतसहितं सुदर्शनं वा अस्त्रम् । सुब्रह्मण्ये ज्वालामालिनि हुम् इत्यस्त्रम् । शास्तरि ज्वलघृणि हुं फट् इत्यस्त्रम् ॥

* * *

126. वास्तुहोमः

रक्षोघ्नहोमाग्निं ऐशान्ये निधाय वास्तुहोमं कुर्यात् ॥

सिन्धुद्वीप ऋषिः गायत्री छन्दः शान्तिर्देवता ।

शं नो देवीरभिष्टये । आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः । शं नो देवीरभिष्टये । आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः इति षडङ्गानि ।

कटकमकुटकाञ्चीभूषिता पद्मसंस्था
विशदकमलगौरा सर्वगीर्वाणवन्द्या ।
अभयवरदहस्ता सुप्रसन्ना द्विनेत्रा
धवळवसनमाल्या शान्तिरव्याच्चिरं वः ।

शं नो देवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥

वास्तुकलशः परिधानतः प्राक् अग्नेः पूर्वे पीठे कलशौ पूजयेत् । पश्चिमगते न्यक्कूर्चे तण्डुलस्वर्णपूर्णे कुम्भे मूलेन देवमावाह्य पूजयेत् । प्राचीने स्वर्णरत्नोदकपूर्णे कलशे शंनोदेव्या ऋचा शान्तिमावाह्य पूजयेत् ॥

अन्वाधानम्- 'वास्तोष्पते प्रतिजानीहि', 'वास्तोष्पते शग्मया' इति द्वाभ्यां पक्वं, वास्तोष्पते ध्रुवास्थूणाम् इत्यादि-षड्भिः[१] जातवेदादिपञ्चभिः, शंन इन्द्राग्नी इत्यादिपञ्च-दशभिः भूरादिभिश्च एकैकवारमाज्येन, पुनः शंनो देवीति मन्त्रेण प्रत्येकम् अष्टोत्तरशतवारं शमीसमिदाज्यचर्वाज्य-पञ्चगव्याक्तदूर्वाद्रव्यैः अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम् .... ॥

वास्तुहोमे, शिवे पञ्चदुर्गास्थाने पञ्चब्रह्ममन्त्रैः होमयेत् ।

हरिहरे पञ्चदुर्गाभ्यः पूर्वं पञ्चतत्वैः होमयेत् ।

---

१. वास्तोष्पते ध्रुवास्थूणाम्.... ; गृह्यं भयं..... ; अक्षिस्पन्देऽङ्गचलने...... ; दुःस्वप्ने पापस्वप्ने च........ ; वास्तोष्पते प्रतरणो......... ; अमीवहा वास्तोष्पते...... ॥

स्कन्दे पञ्चदुर्गाभ्यः अनन्तरं षण्मन्त्रैः होमयेत् ॥

दुर्गायां जातवेदसे इत्यनेन समिदादिचतुर्द्रव्यं होमयेत् ॥

विष्णौ मूलेन पञ्चगव्याक्तदूर्वाः होमयेत् ।

शास्तरि सुब्रह्मण्ये च समिदादिपञ्चद्रव्याणि स्वस्वगायत्र्या जुहुयाद्वा ॥

होमान्ते अग्नेः पूर्वभागेः दर्भाग्रचयं विकीर्य स्विष्टकृतोऽवशिष्टेन तोयाज्यसमन्वितेनान्नेन 'ॐ नमो रुद्राय वास्तोष्पतये आयने विद्रवणे उद्यानेयत्परायणे आवर्तने निवर्तने यो गोपाय तिँहुवे नमः स्वाहा' इति बलिं दद्यात् ।

* * *

127. सप्तसु देवेषु समानः प्रायश्चित्तहोमः

(बिम्बस्य पातचलनादिदोषप्रायश्चित्तम्)

देवस्य अग्रतः चतुरस्रकुण्डे अग्निं प्रजनय्य हुनेत् ।

अन्वाधानम्- प्रधानदेवतां........ पञ्चतत्वैः (सदाशिवं पञ्चब्रह्ममन्त्रैः) प्रतिमन्त्रं षट्शतावृत्त्या त्रिसहस्रवारमाज्येन

पुनः मूलमन्त्रेण प्रत्येकम् अष्टोत्तरसहस्रवारं पलाशसमिदाज्यशालितिललाजद्रव्यैः

पुनः अष्टाविंशतिवारमावर्तितैः भूरादिचतुर्मन्त्रैः द्वादशोर्ध्वशतवारं पालाशसमिद्भिः (२८x४= ११२)

पुनः तत्सवितुरितिमन्त्रेण अष्टोत्तरशतवारं प्रत्येकं दुग्धदधिमध्वाज्यद्रव्यैः अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम्............. ॥

प्रथमपक्षः - त्रिसहस्रं घृतम् ६००x५ = ३०००
समिदादिकम् अष्टोत्तरसहस्रम्।

द्वितीयपक्षः - षट्शतं घृतम् १२०x५ = ६००
समिदादिकं द्विशतम्।

तृतीयपक्षः - त्रिशतं घृतम् ६०x५ = ३००
समिदादिकं शतम् ।

* * *

128. सप्तसु देवेषु समानः शान्तिहोमः

(श्वचोरस्पर्शनादिशान्तिः)

(चोरशान्तिः इति प्रसिद्धो होमः)

ऐश्यां दिशि चतुरश्रकुण्डे अग्निं जनयित्वा हुनेत् ।

अन्वाधानम्-

श्रीनारायणसूक्तस्य चतुर्दशमन्त्रैः	तै.आ.उ. ४,१३
श्रीसूक्तस्य पञ्चदशमन्त्रैः	परिशिष्टम्
अतोदेवादिषण्मन्त्रैः	१,२२,१६-२१
नासदासीदादिसप्तभिर्मन्त्रैः	१०,१२९,१-७

किंस्विद्वनमितिमन्त्रेण २,८,९,६ (तै. ब्रा)

ब्रह्मवनमितिमन्त्रेण २,८,९, ७ (तै.ब्रा)

प्रातरग्निमित्यादिसप्तभिर्मन्त्रैः ७,४१,१-७

अग्नेर्मन्वे इत्यादिचतुस्त्रिंशन्मन्त्रैः[१] ४,७,१५,१ (तै.सं)

संसमिदित्यादिचतुर्भिः १०,१९१,१-४

भद्रं नो अपि वातय मनः इति पादमन्त्रेण १०,२०,१

अरायिकाणे इत्यादिपञ्चमन्त्रैः १०,१५५,१-५

निजगायत्र्या

स्वस्वपञ्चतत्त्वैश्च एकैकवारम् आज्येन, पुनर्मूलमन्त्रेण प्रत्येकमष्टोत्तरशतवारम् अश्वत्थखदिरप्लक्षपलाशपाटलवट-समिद्भिः चरुशेषेण स्विष्टकृतम्............ ॥

* * *

129. शिवे कलशाधिवासहोमः

अन्वाधानम्- प्रधानदेवतां सदाशिवं पलाशसमिदाज्य-चरुलाजसर्षपतिलयवव्रीहिसक्त्वाज्याख्यदशद्रव्यैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा ईशानमन्त्रेण (मूलमन्त्रेण वा) अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम्........ ॥

समिदाज्यचरून् लाजान् सर्षपांश्च तिलान् यवान् ।

---

१. अग्नेर्मन्वे इत्यादि प्रातार्यग्ने प्रतरन्न आयुः इत्यन्तं २२ मन्त्राः यावामिन्द्रा-वरुणामित्यादि सामस्तं वामेते नामयुजे इत्यन्तं १२ मन्त्राः ।

व्रीहीन् सक्तून् पुनश्चाज्यं शिवे द्रव्याणि होमयेत् ॥

बहुकलशविधौ बिम्बाधिवासे च शिवे अधिवासहोमाः

गुरुकुण्डे अग्निं जनयित्वा उपस्थानमन्त्रेण अग्निं नमस्कृत्य स्वस्वाग्निविहरणमन्त्रैः गुरुकुण्डात् परिकुण्डेषु अग्निं विहृत्य होमयेत् ॥

पश्चिमवायव्यमध्ये गुरुकुण्डे -

उपस्थानमन्त्रः- सप्त ते अग्ने... । १,५,३, १४ (तै.सं)

होममन्त्रः- ईशानः सर्वविद्यानां......।

होमद्रव्याणि- पलाशसमिदादिदशद्रव्याणि

आहुतिसङ्ख्या- प्रत्येकम् १०८

पूर्वे चतुरस्रकुण्डे -

अग्निविहरणमन्त्रः - 'अग्निमीळे पुरोहितम्... ।' १,१,१

होममन्त्रः- तत्पुरुषाय विद्महे............. ।

होमद्रव्याणि- पलाशसमिदादिदशद्रव्याणि ।

आहुतिसङ्ख्या- १०८, २८ वा प्रत्येकम्

आग्नेये अश्वत्थदलाकारे -

अग्निविहरणमन्त्रः - 'अग्निः पूर्वेभिः... ।' १,१,२

होममन्त्रः- 'ॐ ॐ ॐ ॐ ॐ सर्वज्ञाय हृदयाय नमः'

होमद्रव्याणि- खदिरसमिदादिदशद्रव्याणि

आहुतिसङ्ख्या- १०८, २८ वा प्रत्येकम्

दक्षिणे अर्धचन्द्रकुण्डे -

अग्निविहरणमन्त्रः - अग्निर्होता............| १,१,५

होममन्त्रः- अघोरेभ्योऽथ.............. |

होमद्रव्याणि- अश्वत्थसमिदादिदशद्रव्याणि

आहुतिसङ्ख्या- १०८, २८ वा प्रत्येकम्

नैर्ऋत्ये त्रिकोणकुण्डे -

अग्निविहरणमन्त्रः - यदङ्गदाशुषे........ | १,१,६

होममन्त्रः- ज्वलितशिखिशिखे अनादिबोधायै शिखायै वषट्

होमद्रव्याणि- प्लक्षसमिदादिदशद्रव्याणि

आहुतिसङ्ख्या- १०८, २८ वा प्रत्येकम्

पश्चिमे वृत्तकुण्डे -

अग्निविहरणमन्त्रः - उपत्वाग्ने.......... | १,१,७

होममन्त्रः- सद्योजातं प्रपद्यामि........ |

होमद्रव्याणि- वटसमिदादिदशद्रव्याणि

आहुतिसङ्ख्या- १०८, २८ वा प्रत्येकम्

वायव्ये षट्कोणकुण्डे -

अग्निविहरणमन्त्रः - सनः पितेव........ | १,१,९

होममन्त्रः- वज्रिणे वज्रधराय स्वाहा स्वतन्त्राय कवचाय हुम्

होमद्रव्याणि- बिल्वसमिदादिदशद्रव्याणि

आहुतिसङ्ख्या- १०८, २८ वा प्रत्येकम्

उत्तरे पद्मकुण्डे -

अग्निविरहणमन्त्रः - अग्निं दूतम्............। १,१२,१

होममन्त्रः- वामदेवाय नमो.........।

होमद्रव्याणि- औदुम्बरसमिदादिदशद्रव्याणि

आहुतिसङ्ख्या- १०८, २८ वा प्रत्येकम्

ऐशान्ये अष्टकोणकुण्डे -

अग्निविहरणमन्त्रः - अग्निमग्निं हवीमभिः.......।१,१२, २

होममन्त्रः -

अमृते तेजोमालिनि तृप्तायै ब्रह्मशिरसे शिरसे स्वाहा

होमद्रव्याणि- काश्मरीसमिदादिदशद्रव्याणि

आहुतिसङ्ख्या- १०८, २८ वा प्रत्येकम्

पञ्चहोमपक्षे दिक्कुण्डोक्तहोमान् कुर्यात् ॥

* * *

130.

शङ्करप्रोक्तप्रायश्चित्तहोमः

(क्षेत्रे मृतिर्जननमित्याद्युक्तदोषप्रायश्चित्तम्)

प्रासादस्य दक्षिणे अर्धचन्द्रोपमे कुण्डे अग्निं जनयित्वा हुनेत् ।

अन्वाधानम्- अत्र प्रधानं प्रधानदेवतां सदाशिवं प्रणव-

व्याहृतिपीठपूजामन्त्रैः सकृत्सकृत् आज्येन, पञ्चप्रणवपूर्वेण तत्पुरुषायेति मन्त्रेण पक्वं पूजामन्त्रैश्चाज्येन, पुनः प्रधानदेवतां सदाशिवम् अघोरेण अष्टोत्तरसहस्रवारम् उदुम्बरसमिद्भिः,

सद्योजातमन्त्रेण अष्टोत्तरसहस्रवारम् अपामार्गसमिद्भिः,

वामदेवमन्त्रेण अष्टोत्तरसहस्रवारम् आज्येन,

तत्पुरुषमन्त्रेण अष्टोत्तरसहस्रवारं चरुणा,

पुनः तत्पुरुषमन्त्रेण अष्टोत्तरशतवारं पृथक् तिल, सर्षप, मुद्ग, व्रीहि, यवैः,

पुनः तत्पुरुषमन्त्रेण अष्टोत्तरसहस्रवारं घृताक्तदूर्वात्रिकाग्रैः,

पुनः मृत्युञ्जयमन्त्रेण (ॐ जुं सः) अष्टोत्तरशतवारं प्रत्येकं दधि-मधु-आज्यद्रव्यैः अन्तरान्तरा पूर्णासहितं, चरुशेषेण स्विष्टकृतम् ....॥

* * *

131.

शिवे शान्तिहोमः

(अद्भुतोत्पातदर्शनशान्तिः)

ईशकोणे चतुरश्रकुण्डे अग्निं जनयित्वा हुनेत् ।

अन्वाधानम्- प्रधानदेवतां सदाशिवं तत्पुरुषमन्त्रेण अष्टोत्तरशतवारं प्रत्येकं प्लक्षोदुम्बरवटाश्वत्थसमिदाज्यचरु-मधुक्षीराज्याप्लुतदूर्वा-लाजसर्षपतिलयवशालिसक्तुघृताख्य-चतुर्दशद्रव्यैः अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम् .... ॥

132. शिवे विशेषशान्तिहोमः[1]

ईशकोणे चतुरश्रकुण्डे अग्निं जनयित्वा हुनेत्।

अन्वाधानम् - अस्मिन् जनितेऽग्नौ पीठपूजामन्त्रहोमान्तमुक्त्वा यत इन्द्रभयामहे स्वस्तिदाविशस्पतिरिति द्वाभ्यं पञ्च पूजामन्त्रहोमान्तमुक्त्वा-

१. वास्तोष्पते प्रतिजानीह्यस्मान् ७,५४,१

२. वास्तोष्पते शग्मया ७,५४,३

३. शं नो देवीरभिष्टये १०,९,४

४. इन्द्राग्नी रोचना ३,१२,९

५. कयानश्चित्र ४,३१,१

६. को अद्य युङ्क्ते १,८४,१६

७. भवतन्नसमनसौ इति मन्त्रैः १,३,७,१ (तै.सं)

८. कनिक्रदादिषड्भिः २,४२,१-६

१४. स्वस्त्याद्यष्टभिः[2] ५,५१,११-१५

२२. वास्तोष्पते ध्रुवास्थूणामित्यादिषड्भिः (वास्तुहोमे निर्दिष्टम्)

२८. सद्योजातादिपञ्चभिः १०,४३, १ (तै.आ)

३३. जातवेदादिपञ्चभिः १०,२,१-५ (तै.आ)

---

१. सर्वेषु देवेषु दहनपातादिदोषशान्त्यर्थं पञ्चब्रह्ममन्त्रस्थाने स्वपञ्चतत्त्वैः आज्येन, तत्पुरुषस्थाने स्वगायत्र्या चतुर्दशद्रव्याणि च होमयन्ति।

२. स्वस्त्यादिपञ्चमन्त्राः, द्वौ खिलमन्त्रौ, स्वस्ति न इन्द्रो वृद्धश्रवाः..... इति च।

३८. शं न इन्द्राग्नी इत्यादिपञ्चदशभिः ७,३५,१-१५

५३. सहस्रशीर्षा इत्यादिषोडशभिः १०,९०,१-१६

६९. व्यस्तसमस्तव्याहृतिभिश्चाज्यद्रव्येण

पुनः तत्पुरुषगायत्र्या प्रत्येकम् अष्टोत्तरशतवारं पलाशसमिदाज्यचर्वाज्यलाजाज्यसर्षपाज्यतिलाज्ययवाज्य-मुद्गाज्याख्यचतुर्दशद्रव्यैः अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम् .... ॥

स्विष्टकृदवसाने अग्निपूर्वभागे स्थण्डिलं कृत्वा दर्भान् विकीर्य शंनोदेवीरिति मन्त्रेण हुतशेषेण चरुणा बलिं दद्यात् ।

* * *

133. विष्णौ कलशाधिवासहोमः

अन्वाधानम्- अत्र प्रधानदेवतां महाविष्णुं पलाशसमिदाज्य-चरुलाजसर्षपयवतिलव्रीहिघृताख्यनवद्रव्यैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा मूलमन्त्रेण, अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम्........ ॥

समिदाज्यचरून् लाजान् सर्षपांश्च यवान् तिलान् ।
व्रीहीन् घृतमिति प्राहुः नव मूलेन विष्णवे ॥

बहुकलशविधौ बिम्बाधिवासे च विष्णौ अधिवासहोमाः

गुरुकुण्डे अग्निं जनयित्वा उपस्थानमन्त्रेण अग्निं नमस्कृत्य

स्वस्वाग्निविहरणमन्त्रैः गुरुकुण्डात् परिकुण्डेषु अग्निं विहृत्य होमयेत् ॥

पश्चिमवायव्यमध्ये चतुरश्ररूपगुरुकुण्डे -

उपस्थानमन्त्रः अग्निं दूतं वृणीमहे ....॥ १,१२,१

होममन्त्रः - मूलमन्त्रः

होमद्रव्याणि - पलाशसमिदादिनवद्रव्याणि

आहुतिसङ्ख्या - प्रत्येकम् १०८

पूर्वे चतुरश्रकुण्डे -

अग्निविहरणमन्त्रः - 'अग्निना रयिम्.........'' १,१,१३

होममन्त्रः - अ ॐ नमो भगवते वासुदेवाय अ

होमद्रव्याणि - अश्वत्थसमिदादिनवद्रव्याणि

आहुतिसङ्ख्या - १०८, २८ वा

दक्षिणे अर्धचन्द्रकुण्डे -

अग्निविहरणमन्त्रः - त्वमग्ने द्युभिः........ २,१,१

होममन्त्रः - आ ॐ नमो भगवते सङ्कर्षणाय आ

होमद्रव्याणि - उदुम्बरसमिदादिनवद्रव्याणि

आहुतिसङ्ख्या - १०८ , २८ वा प्रत्येकम्

पश्चिमे वृत्तकुण्डे -

अग्निविहरणमन्त्रः - अग्न आयाहि वीतये...... ६,१६,१०

होममन्त्रः - अम् ॐ नमो भगवते प्रद्युम्नाय अम्

होमद्रव्याणि - वटसमिदादिनवद्रव्याणि

आहुतिसङ्ख्या - १०८, २८ वा प्रत्येकम्

उत्तरे पद्माकारकुण्डे -

अग्निविहरणमन्त्रः - अग्निमग्निं हवीमभिः...... । १,१२,२

होममन्त्रः - अः ॐ नमो भगवते अनिरुद्धाय अः

होमद्रव्याणि - प्लक्षसमिदादिनवद्रव्याणि

आहुतिसङ्ख्या - १०८, २८ वा प्रत्येकम्

* * *

134. विष्णौ शान्तिहोमः

ऐशान्ये चतुरश्रकुण्डे अग्निं जनयित्वा हुनेत् ।

अन्वाधानम्- प्रधानदेवतां विष्णुं षोन्नमः परायेत्यादिपञ्चतत्वमन्त्रैः, द्वादशाक्षरेणाष्टाक्षरेण स्वगायत्र्या जितं ते इति मन्त्रेण सहस्रशीर्षेत्यादि षोडशभिः एवं पञ्चविंशतिमन्त्रैः प्रत्येकं चतुर्विंशतिवारमाज्यद्रव्येण,

पुनः ॐ षों नमः पराय परमेष्ठ्यात्मने वासुदेवाय नमः । इति चतुर्विंशतिवारमाज्येन

ॐ यं नमः पराय पुरुषात्मने सङ्कर्षणाय नमः । इति चतुर्विंशतिवारमपामार्गसमिद्भिः

ॐ रां नमः पराय विश्वात्मने प्रद्युम्नाय नमः । इति चतुर्विंशतिवारमाज्येन

ॐ वं नमः पराय निवृत्त्यात्मने अनिरुद्धाय नमः । इति चतुर्विंशतिवारममृतसमिद्भिः

ॐ लां नमः पराय सर्वात्मने नारायणाय नमः । इति चतुर्विंशतिवारमाज्येन

ॐ नमो भगवते वासुदेवाय इति चतुर्विंशतिवारं सहदेवीसमिद्भिः

ॐ नमो नारायणायेति चतुर्विंशतिवारमाज्येन

ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयादिति चतुर्विंशतिवारम् ऐन्द्रीसमिद्भिः ।

ॐ 'जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन । सुब्रह्मण्य नमस्तेऽस्तु महापुरुषपूर्वज ॥' इति चतुर्विंशतिवारमाज्येन

'सहस्रशीर्षे'ति मन्त्रेण चतुर्विंशतिवारं भद्रिकासमिद्भिः

'पुरुष एवेदमि'ति चतुर्विंशतिवारमाज्येन

'एतावानस्ये'ति मन्त्रेण चतुर्विंशतिवारम् अञ्जलिसमिद्भिः

'त्रिपादूर्ध्व' इति चतुर्विंशतिवारमाज्येन

'तस्माद्विराळ्' इति चतुर्विंशतिवारं दूर्वासमिद्भिः

'यत्पुरुषेणे'ति मन्त्रेण चतुर्विंशतिवारमाज्येन

'तं यज्ञमि'ति मन्त्रेण चतुर्विंशतिवारं सर्षपद्रव्येण

'तस्माद्यज्ञात्' मन्त्रेण चतुर्विंशतिवारमाज्येन

'तस्माद्यज्ञात्सर्वहुतः ऋचः' इति मन्त्रेण चतुर्विंशतिवारं शालिद्रव्येण

'तस्मादश्वा' इति मन्त्रेण चतुर्विंशतिवारम् आज्येन

'यत्पुरुषं व्यदधुः' इति मन्त्रेण चतुर्विंशतिवारं यवद्रव्येण

'ब्राह्मणोऽस्ये'ति मन्त्रेण चतुर्विंशतिवारमाज्येन

'चन्द्रमा मनसो' इति मन्त्रेण चतुर्विंशतिवारं तिलैः

'नाभ्या आसीदन्तरिक्षमि'तिमन्त्रेण चतुर्विंशतिवारम् आज्येन

'सप्तास्याऽसन्' इति मन्त्रेण चतुर्विंशतिवारं चरुद्रव्येण

'यज्ञेन यज्ञमि'ति मन्त्रेण चतुर्विंशतिवारमाज्येन

अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् ॥

* * *

135. हरिहरे कलशाधिवासहोमः

प्रधानदेवतां हरिहरं पलाशसमिदाज्यचर्वाज्यतिल-सर्षपयवलाजघृताख्यनवद्रव्यैः अष्टोत्तरशतवारम् अष्टाविंशति-वारं वा क्रमेण चतुर्भिर्वेदाद्यैः भूरादिचतुर्भिः मूलेन इति नवभिर्मन्त्रैः (मूलेन वा) अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम्.......... ॥

समिदाज्यचरूनाज्यं क्रमेण तिलसर्षपौ ।
यवलाजघृतानीति हरीशे नव होमयेत् ॥

बहुकलशविधौ बिम्बाधिवासे च हरिहरे अधिवासहोमाः

गुरुकुण्डे अग्निं जनयित्वा उपस्थानमन्त्रेण अग्निं नमस्कृत्य स्वस्वाग्निविहरणमन्त्रैः गुरुकुण्डात् परिकुण्डेषु अग्निं विहृत्य होमयेत् ॥

पश्चिमवायव्यमध्ये चतुरश्ररूपगुरुकुण्डे-

उपस्थानमन्त्रः- अग्निं दूतं वृणीमहे........ । १,१२,१

होममन्त्राः- अग्निमीळे, इषे त्वोर्जे त्वा, अग्न आयाहि, शन्नो देवीः, भूः, भुवः, स्वः, भूर्भुवःस्वः, मूलमन्त्रः

होमद्रव्याणि - क्रमेण पलाशसमिदाज्यचर्वाज्यतिलसर्षपयव-लाजघृतानि ।

आहुतिसङ्ख्या - १०८ प्रत्येकम् ।

पूर्वे चतुरश्रकुण्डे - अग्निविहरणमन्त्रः - प्रणवः

होममन्त्राः- अग्निमीळे, इषे त्वोर्जे त्वा, अग्न आयाहि, शन्नो देवीः, भूः, भुवः, स्वः, भूर्भुवःस्वः, मूलमन्त्रः

होमद्रव्याणि - क्रमेण पलाशसमिदाज्यचर्वाज्यतिलसर्षपयव-लाजघृतानि ।

आहुतिसङ्ख्या - प्रत्येकम् १०८, २८ वा ।

दक्षिणे अर्धचन्द्रकुण्डे - अग्निविहरणमन्त्रः - प्रणवः

होममन्त्राः- अग्निमीळे, इषेत्वोर्जे त्वा, अग्न आयाहि, शन्नो देवीः, भूःभुवःस्वः, भूर्भुवःस्वः, मूलम् ।

होमद्रव्याणि - क्रमेण पलाशसमिदाज्यचर्वाज्यतिलसर्षपयव-लाजघृतानि

आहुतिसङ्ख्या - प्रत्येकम् १०८, २८ वा ।

पश्चिमे वृत्ताकारकुण्डे - अग्निविहरणमन्त्रः - प्रणवः

होममन्त्राः - अग्निमीळे, इषे त्वोर्जे त्वा, अग्न आयाहि, शन्नो देवीः, भूः, भुवः, स्वः, भूर्भुवःस्वः, मूलम् ।

होमद्रव्याणि - क्रमेण पलाशसमिदाज्यचर्वाज्यतिलसर्षपयव-लाजघृतानि

आहुतिसङ्ख्या - प्रत्येकम् १०८, २८ वा ।

उत्तरे त्रिकोणकुण्डे - अग्नि वहरणमन्त्रः - प्रणवः

होममन्त्राः - अग्निमीळे, इषेत्वोर्जे त्वा, अग्न आयाहि, शन्नो देवीः, भूः, भुवः, स्वः, भूर्भुवःस्वः, मूलम् ।

होमद्रव्याणि - क्रमेण पलाशसमिदाज्यचर्वाज्यतिलसर्षपयव-लाजघृतानि

आहुतिसङ्ख्या - प्रत्येकम् १०८, २८ वा ।

हरिहरे शङ्करप्रोक्तप्रायश्चित्तहोमवत् प्रोक्तहोमं कुर्यात् ॥

हरिहरे शैवोक्तं वैष्णवोक्तं च सामान्यप्रायश्चित्तहोमं पृथक् कुर्यात् ।

एवमेव शैवोक्तं वैष्णवोक्तं च शान्तिहोमं पृथक् आचरेत् ॥

* * *

136. दुर्गायां कलशाधिवासहोमः

प्रधानदेवतां दुर्गां पञ्चदुर्गामन्त्रैः सकृत्सकृदाज्येन पुनः पलाशसमिदाज्यचरुयवव्रीहितिलसर्षपदूर्वाख्यैः अष्टद्रव्यैः अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा "जातवेदसे' इति मन्त्रेण (मूलेन वा) अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् .... ॥

सें दुर्गायै नमः, दं आर्यायै नमः, वें देव्यै नमः, तं भगवत्यै नमः, जां कन्यकायै नमः इति पञ्चदुर्गामन्त्राः ॥

समिदाज्ये चरुयवान् व्रीहींश्च तिलसर्षपान् ।
दूर्वांश्च होमयेत् देव्या अष्टद्रव्याणि त्रिष्टुभा ॥

बहुकलशविधौ बिम्बाधिवासे च दुर्गायाम् अधिवासहोमाः

गुरुकुण्डे अग्निं जनयित्वा उपस्थानमन्त्रेण अग्निं नमस्कृत्य स्वस्वाग्निविहरणमन्त्रैः गुरुकुण्डात् परिकुण्डेषु अग्निं विहृत्य होमयेत् ॥

पश्चिमवायव्यमध्ये चतुरश्ररूपगुरुकुण्डे-

उपस्थानमन्त्रः- अग्निं दूतं वृणीमहे......... । १,१२,१

होममन्त्राः द्रव्याणि च - पञ्चदुर्गामनुभिः सकृत्सकृदाज्यं, दुर्गात्रिष्टुभा पलाशसमिदाद्यष्टद्रव्याणि ॥

आहुतिसङ्ख्या- १०८ प्रत्येकम् ।

पूर्वे चतुरश्रकुण्डे -

अग्निविहरणमन्त्रः - अग्निमीळे पुरोहितम् ..... । १,१,१

होममन्त्राः द्रव्याणि च - पञ्चदुर्गामन्त्रैः सकृत्सकृदाज्यं, पुनः अग्निमीळे इति मन्त्रेण पलाशसमिधः, दुर्गात्रिष्टुभा आज्यचरुयवव्रीहितिलसर्षपदूर्वाः ।

आहुतिसङ्ख्या- प्रत्येकम् १०८, २८ वा ।

दक्षिणे अर्धचन्द्रकुण्डे -

अग्निविहरणमन्त्रः - त्वमग्ने द्युभिः..... । ४,१,२,२१ (तै.सं)

होममन्त्राः द्रव्याणि च- पञ्चदुर्गामन्त्रैः सकृत्सकृदाज्यम्, पुनः इषे त्वोर्जे त्वा इति मन्त्रेण पिप्पलसमिधः, दुर्गात्रिष्टुभा आज्यचरुयवव्रीहितिलसर्षपदूर्वाः

आहुतिसङ्ख्या- प्रत्येकम् १०८, २८ वा ।

पश्चिमे वृत्ताकारकुण्डे -

अग्निविहरणमन्त्रः - अग्न आयाहि वीतये.... । ६,१६,१०

होममन्त्रा द्रव्याणि च- पञ्चदुर्गामन्त्रैः सकृत्सकृदाज्यम्, अग्न आयाहि मन्त्रेण खदिरसमिधः, दुर्गात्रिष्टुभा आज्यचरुयवव्रीहितिलसर्षपदूर्वाः

आहुतिसङ्ख्या- प्रत्येकम् १०८, २८ वा ।

उत्तरे त्रिकोणकुण्डे -

अग्निविहरणमन्त्रः - अग्निमग्निं हवीमभिः..... । १,१२,१

होममन्त्राः द्रव्याणि च- पञ्चदुर्गामन्त्रैः सकृत्सकृदाज्येन शन्नोदेवीः इति मन्त्रेण बिल्वसमिधः, दुर्गात्रिष्टुभा आज्यचरु-यवव्रीहितिलसर्षपदूर्वाः ॥

आहुतिसङ्ख्या- प्रत्येकम् १०८, २८ वा।

* * *

137. दुर्गायां प्रायश्चित्तहोमः ।

(क्षेत्रे मृतिर्जननमित्याद्युक्तदोषप्रायश्चित्तम्)

दुर्गायां प्रासादस्योत्तरभागे त्रिकोणं दक्षिणभागे अर्धचन्द्रं च कुण्डं कृत्वा पृथगग्निं जनयित्वा उभयत्र होमं कुर्यात् । गुरुतरे दोषे पूर्वे चतुरश्रकुण्डम्, पश्चिमे वृत्तकुण्डं च कृत्वा अग्निं जनयित्वा उत्तरपूर्वदक्षिणपश्चिमक्रमेण चतुरः होमानादधीत ।

अन्वाधानम्- प्रधानदेवतां दुर्गां पञ्चदुर्गामन्त्रैः पृथक्
द्वाविंशतिसङ्ख्यया दशोत्तरशतवारमाज्येन २२x५= ११०
जातवेदसे इति मन्त्रेणाष्टोत्तरशतवारं खदिरसमिद्भिः
तामग्निवर्णामिति मन्त्रेणाष्टोत्तरशतवारं पालाशसमिद्भिः
अग्नेत्वमितिमन्त्रेणाष्टोत्तरशतवारम् अश्वत्थसमिद्भिः
विश्वानिनो इति मन्त्रेणाष्टोत्तरशतवारं प्लक्षसमिद्भिः
पृतनाजितमिति मन्त्रेणाष्टोत्तरशतवारं न्यग्रोधसमिद्भिः
मूलेनाष्टोत्तरशतवारम् अपामार्गसमिद्भिः
पृतनाजितमिति मन्त्रेणाष्टोत्तरशतवारं बिल्वसमिद्भिः

विश्वानिनो इति मन्त्रेणाष्टोत्तरशतवारम् उदुम्बरसमिद्भिः
अग्नेत्वमिति मन्त्रेणाष्टोत्तरशतवारम् अञ्जलिसमिद्भिः
मूलेनाष्टोत्तरशतवारं प्रत्येकं तिलसर्षपनीवारद्रव्यैः
मृत्युञ्जयमन्त्रेणाष्टोत्तरशतवारं प्रत्येकं दधिमध्वाज्यद्रव्यैः
अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम्....... ॥

* * *

138. दुर्गाशान्तिहोमः

ईशकोणे चतुरश्रकुण्डं कृत्वा अग्निं जनयित्वा होमयेत् ॥

अन्वाधानम्- अत्र प्रधानं प्रधानदेवतां दुर्गां दुर्गायागमन्त्रेण अष्टोत्तरसहस्रवारमाज्यद्रव्येण, चरुशेषेण स्विष्टकृतम्..... ॥

यागमन्त्रः- ॐ दुर्गारूपिणि कुमारीरूपिणि आर्यावर्तिनि मायारूपिणि उत्सववासिनि यागभक्तकारिणि सर्वमन्त्रव्यापिनि सर्वकर्मफलदायिनि सर्वक्रियावर्तिनि सर्वदोषमर्दिनि सर्ववरदायिनि भगवति प्रसादमापादयतु ॥

* * *

139. गणपतौ कलशाधिवासहोमः

अन्वाधानम्- प्रधानदेवतां गणपतिं षण्मन्त्रैः सकृत्सकृदाज्येन, मूलेन अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा

बिल्वसमिदाज्यचरुलाजपृथुकलड्डुकापूपशष्कुल्याज्याख्य-नवद्रव्यैः अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम्........॥

समिदाज्यचरून् लाजान् पृथुकान् लड्डुकानपि ।
अपूपशष्कुल्याज्यानि विघ्ने मूलेन होमयेत् ॥

षण्मन्त्राः- ॐ विघ्नाय नमः । ॐ विनायकाय नमः । ॐ वीराय नमः । ॐ शूराय नमः । ॐ वरदाय नमः । ॐ हस्तिमुखाय नमः ॥

बहुकलशविधौ बिम्बाधिवासे च गणपतौ अधिवासहोमाः

गुरुकुण्डे अग्निं जनयित्वा उपस्थानमन्त्रेण अग्निं नमस्कृत्य स्वस्वाग्निविहरणमन्त्रैः गुरुकुण्डात् परिकुण्डेषु अग्निं विहृत्य होमयेत् ॥

पश्चिमवायव्यमध्ये चतुरश्ररूपगुरुकुण्डे-

उपस्थानमन्त्रः- अग्निं दूतं वृणीमहे........ । १,१२,१

होममन्त्राः द्रव्याणि च- षण्मन्त्रैः सकृत्सकृदाज्यं पुनः मूलमन्त्रेण बिल्वसमिदाज्यचरुलाजपृथुकलड्डुकापूपशष्कुल्याज्यानीति नवद्रव्याणि ॥

आहुतिसङ्ख्या १०८ प्रत्येकम् ।

पूर्वे चतुरश्रकुण्डे -

विहरणमन्त्रः - षण्मन्त्रान्ते ॐ गं गणञ्जयाय नमः ।

होममन्त्राः द्रव्याणि च- षण्मन्त्रैः सकृत्सकृत् आज्यम्, ॐ गं गणञ्जयाय नमः इति पलाशसमिदादिनवद्रव्याणि।

आहुतिसङ्ख्या १०८, २८ वा प्रत्येकम्।

आग्नेये - अश्वत्थदलाकारकुण्डे -

विहरणमन्त्रः - षण्मन्त्रान्ते ॐ गिं विघ्नेश्वराय नमः।

होममन्त्राः द्रव्याणि च - षण्मन्त्रैः सकृत्सकृदाज्यम्, 'ॐ गिं विघ्नेश्वराय नमः' इति बिल्वसमिदादिनवद्रव्याणि

आहुतिसङ्ख्या १०८, २८ वा प्रत्येकम्।

दक्षिणे- अर्धचन्द्रकुण्डे -

विहरणमन्त्रः - षण्मन्त्रान्ते 'ॐ गुं एकदंष्ट्राय नमः।

होममन्त्राः द्रव्याणि च- षण्मन्त्रैः सकृत् सकृदाज्यम् 'ॐ गुं एकदंष्ट्राय नमः' इति खदिरसमिदादिनवद्रव्याणि।

आहुतिसङ्ख्या १०८, २८ वा प्रत्येकम्।

नैर्ऋत्ये त्रिकोणकुण्डे -

विहरणमन्त्रः - षण्मन्त्रान्ते 'ॐ गृं वीराय नमः'।

होममन्त्राः द्रव्याणि च- षण्मन्त्रैः सकृत्सकृदाज्यम्, 'ॐ गृं वीराय नमः' इति बिल्वसमिदादिनवद्रव्याणि।

आहुतिसङ्ख्या १०८, २८ वा प्रत्येकम्।

पश्चिमे वृत्तकुण्डे -

अग्निविहरणमन्त्रः -षण्मन्त्रान्ते 'ॐ ग्लं गजवक्त्राय नमः' ।

होममन्त्रः द्रव्याणि च - षण्मन्त्रैः सकृत्सकृदाज्यम्, 'ॐ ग्लं गजवक्त्राय नमः' इति अश्वत्थसमिदादिनवद्रव्याणि

आहुतिसङ्ख्या १०८, २८ वा प्रत्येकम् ।

वायव्ये षट्कोणकुण्डे -

अग्निविहरणमन्त्रः - षण्मन्त्रान्ते 'ॐ गें लम्बोदराय नमः ।

होममन्त्रः द्रव्याणि च- षण्मन्त्रैः सकृत्सकृदाज्यम्, 'ॐ गें लम्बोदराय नमः ।' इति बिल्वसमिदादिनवद्रव्याणि ।

आहुतिसङ्ख्या- १०८, २८ वा प्रत्येकम् ।

उत्तरे पद्मकुण्डे -

अग्निविहरणमन्त्रः - षण्मन्त्रान्ते 'ॐ गों वरदाय नमः' ।

होममन्त्रः द्रव्याणि च- षण्मन्त्रैः सकृत्सकृदाज्यम्, 'ॐ गों वरदाय नमः' इति शमीसमिदादिनवद्रव्याणि ।

आहुतिसङ्ख्या १०८, २८ वा प्रत्येकम् ।

ऐशान्ये अष्टकोणकुण्डे -

अग्निविरहणमन्त्रः- षण्मन्त्रान्ते 'ॐ गं भक्तप्रियाय नमः' ।

होममन्त्रः द्रव्याणि च- षण्मन्त्रैः सकृत्सकृदाज्यम् 'ॐ गं भक्तप्रियाय नमः' इति बिल्वसमिदादिनवद्रव्याणि ।

पञ्चहोमपक्षे दिक्कुण्डोक्तहोमान् कुर्यात् ॥

आहुतिसङ्ख्या १०८, २८ वा प्रत्येकम् ।

140.

विघ्नप्रोक्तप्रायश्चित्तहोमः

(क्षेत्रे मृतिर्जननमित्याद्युक्तदोषप्रायश्चित्तम्)

प्रासादस्य दक्षिणे भागे अर्धचन्द्राकारे कुण्डे अग्निं जनयित्वा हुनेत् ।

अन्वाधानम्- प्रधानदेवतां गणपतिं षण्मन्त्रैः एकैकवारम् अष्टोत्तरशतवारं वा आज्यद्रव्येण

पुनः षण्मन्त्रैः द्व्युत्तरशतवारं (१७x६ = १०२) द्व्युत्तर-सहस्रवारं (१६७x६= १००२) त्रिसहस्रवारं (५००x६= ३०००) वा (दोषस्य बलाबलमवलोक्य) प्रत्येकं बिल्वसमिदाज्यचरुलाजपृथुकलड्डुकापूपशष्कुल्याज्यानीति नवद्रव्यैः

पुनः भूरादि व्यस्तसमस्तव्याहृतिभिः क्रमेणाष्टोत्तरशतवारं दधिक्षीरमधुघृतद्रव्यैः

पुनः गणानान्त्वेति ऋचा अष्टोत्तरशतवारं गुडद्रव्येण

पुनः मूलमन्त्रेणाष्टोत्तरशतवारं पञ्चगव्येन

अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् ....॥

* * *

141.

गणपतौ शान्तिहोमः

ऐशान्ये चतुरश्रकुण्डे अग्निं जनयित्वा हुनेत् ।

अन्वाधानम्- अत्र प्रधानं प्रधानदेवतां गणपतिं गायत्र्या अष्टोत्तरशतवारं प्रत्येकं प्लक्षोदुम्बराश्वत्थवटसमिदाज्यचरु-

मधुक्षीराज्याप्लुतदूर्वा-लाजपृथुकलड्डुकापूपशष्कुल्याज्याख्य-त्रयोदशद्रव्यैः अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् .... ॥

गायत्री - विनायकाय विद्महे गजवक्त्राय धीमहे। तन्नो विघ्नः प्रचोदयात् ॥

* * *

142. सुब्रह्मण्ये कलशाधिवासहोमः

अन्वाधानम्- प्रधानदेवतां सुब्रह्मण्यं मूलमन्त्रेण षड्वारमाज्येन पुनः उपचारमन्त्रद्वादशनाममन्त्रैः सकृत्सकृदाज्येन, पुनः मूलमन्त्रेण बिल्वसमिदाज्यचरुलाजतिलयवसर्षपाख्य-सप्तद्रव्यैः अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् .... ॥

समिदाज्यचरून् लाजान् तिलानपि यवान् क्रमात् ।
सर्षपानिति मूलेन षण्मुखे सप्त होमयेत् ॥

अपरः मूलमनुः; उपचारमनुश्च - ॐ नमः षण्मुखाय

द्वादशनाममन्त्राः- ॐ स्कन्दाय नमः । ॐ बाणाय नमः । ॐ हेमचूडाय नमः। ॐ भद्रसेनाय नमः। ॐ भवाय नमः । ॐ भवपुत्राय नमः। ॐ अन्नाद्यशीलाय नमः। ॐ कुक्कुटध्वजाय नमः । ॐ मयूरवाहनाय नमः । ॐ गुहाय नमः । ॐ सनत्कुमाराय नमः । ॐ महासेनाय नमः ।

बहुकलशविधौ बिम्बाधिवासे च सुब्रह्मण्ये अधिवासहोमाः

गुरुकुण्डे अग्निं जनयित्वा उपस्थानमन्त्रेण अग्निं नमस्कृत्य स्वस्वाग्निविहरणमन्त्रैः गुरुकुण्डात् परिकुण्डेषु अग्निं विहृत्य होमयेत् ॥

पश्चिमवायव्यमध्ये चतुरश्ररूपगुरुकुण्डे -

उपस्थानमन्त्रः- अग्निं दूतं वृणीमहे......... । १,१२,१

अन्वाधानम्- प्रधानदेवतां सुब्रह्मण्यं मूलेन षड्वारमाज्येन, उपचारमन्त्रद्वादशनाममन्त्रैः सकृत्सकृदाज्येन, पुनर्मूलमन्त्रेण बिल्वसमिदाज्यचरुलाजतिलयवसर्षपाख्यसप्तद्रव्यैः अष्टोत्तरशतवारम् अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम् ....॥

पूर्वे चतुरश्रकुण्डे

अग्निविहरणमन्त्रः - ॐ सनत्कुमाराय नमः, मूलद्वयं, स्कन्दादिद्वादशनामानि, ॐ सनत्कुमाराय नमः ।

अन्वाधानम्- प्रधानदेवतां सुब्रह्मण्यम् 'ॐ सनत्कुमाराय नमः' इति षड्वारमाज्येन, मूलमन्त्रद्वयेन स्कन्दप्रोक्तद्वादशनामभिश्च सकृत्सकृदाज्येन, 'ॐ सनत्कुमाराय नमः' इति मन्त्रेण पलाशसमिदाज्यचरुलाजतिलयवसर्षपाख्यसप्तद्रव्यैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम् ...... ।

आग्नेये अश्वत्थपर्णसदृशे कुण्डे -

अग्निविहरणमन्त्रः- ॐ भवपुत्राय नमः, मूलद्वयं, स्कन्दादि-द्वादशनामानि, भवपुत्राय नमः ।

अन्वाधानम् - प्रधानदेवतां सुब्रह्मण्यम् 'ॐ भवपुत्राय नमः' इति षड्वारमाज्येन, मूलमन्त्रद्वयेन स्कन्दप्रोक्तद्वादश-नामभिश्च सकृत्सकृदाज्येन, पुनः 'ॐ भवपुत्राय नमः' इति मन्त्रेण खदिरसमिदाज्यचरुलाजतिलयवसर्षपाख्यसप्तद्रव्यैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम्........ ॥

दक्षिणे अर्धचन्द्रकुण्डे -

अग्निविहरणमन्त्रः- 'ॐस्कन्दाय नमः', मूलद्वयं, स्कन्दादि-द्वादशनामानि, ॐ स्कन्दाय नमः ।

अन्वाधानम् - प्रधानदेवतां सुब्रह्मण्यम् 'ॐ स्कन्दाय नमः' इति षड्वारमाज्येन, मूलमन्त्रद्वयेन स्कन्दप्रोक्तद्वादशनामभिश्च सकृत्सकृदाज्येन, पुनः 'ॐ स्कन्दाय नमः' इति मन्त्रेण अश्वत्थसमिदाज्यचरुलाजतिलयवसर्षपाख्यसप्तद्रव्यैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुति-सहितं चरुशेषेण स्विष्टकृतम्....... ॥

पश्चिमे वृत्तकुण्डे -

अग्निविहरणमन्त्रः- ॐ बाणाय नमः, मूलद्वयं, स्कन्दादिद्वादशनामानि, ॐ बाणाय नमः ।

अन्वाधानम् - प्रधानदेवतां सुब्रह्मण्यम् 'ॐ बाणाय नमः' इति षड्वारमाज्येन, मूलमन्त्रद्वयेन स्कन्दप्रोक्तद्वादशनामभिश्च सकृत्सकृदाज्येन, पुनः 'ॐ बाणाय नमः' इति मन्त्रेण प्लक्षसमिदाज्यचरुलाजतिलयवसर्षपाख्यसप्तद्रव्यैः अष्टोत्तर-शतवारं अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम् .... ॥

उत्तरे त्रिकोणकुण्डे -

अग्निविहरणमन्त्रः - ॐ हेमचुडाय नमः, मूलद्वयं, स्कन्दादि-द्वादशनामानि, हेमचुडाय नमः ।

अन्वाधानम्- प्रधानदेवतां सुब्रह्मण्यम् 'ॐ हेमचूडाय नमः' इति षड्वारमाज्येन पुनः मूलद्वयेन स्कन्दप्रोक्त द्वादश-नामभिश्च सकृत्सकृदाज्येन पुनः 'ॐ हेमचूडाय नमः' इति मन्त्रेण वटसमिदाज्यचरुलाजतिलयवसर्षपाख्यसप्तद्रव्यैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् .... ॥

ऐशान्ये अष्टकोणकुण्डे-

अग्निविहरणमन्त्रः- ॐ भद्रसेनाय नमः, मूलद्वयं, स्कन्दादिद्वादशनामानि, 'ॐ भद्रसेनाय नमः ।'

अन्वाधानम् - प्रधानदेवतां सुब्रह्मण्यम् ''ॐ भद्रसेनाय नमः' इति षड्वारमाज्येन, पुनः मूलद्वयेन स्कन्दप्रोक्तद्वादशनामभिश्च सकृत्सकृदाज्येन, पुनः 'ॐ भद्रसेनाय नमः' इति मन्त्रेण

उदुम्बरसमिदाज्यचरुलाजतिलयवसर्षपाख्यसप्तद्रव्यैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम्........ ।

* * *

143.

स्कन्दप्रोक्तप्रायश्चित्तहोमः

(क्षेत्रे मृतिर्जननमित्याद्युक्तदोषप्रायश्चित्तम्)

प्रासादस्य दक्षिणेऽर्धचन्द्रकुण्डे अग्निं जनयित्वा हुनेत् ।

अन्वाधानम्- प्रधानदेवतां सुब्रह्मण्यं षण्मन्त्रैः मूलद्वयेन, गायत्र्या, द्वादशनाममन्त्रैः भूरादिभिश्च सकृत्सकृदाज्येन

पुनः सप्तदशवारमावर्तितैः षण्मन्त्रैः प्रतिद्रव्यं द्व्युत्तर शतवारं (१७x६ = १०२) कदम्बसमिदाज्यचरुलाजसर्षपयव तिलाख्यसप्तद्रव्यैः

पुनः भूरादिभिः व्यस्तसमस्तव्याहृतिभिः अष्टोत्तरशतवारं क्रमेण आज्यक्षीरदधिक्षौद्रैः

पुनः मृत्युञ्जयमन्त्रेण, (ॐ जूं सः) त्रिसहस्रवारं त्रिमधुरसिक्तदूर्वाद्रव्येण चरुशेषेण स्विष्टकृतम् .... ॥

स्कन्दषण्मन्त्राः - ॐ सनत्कुमाराय नमः । ॐ स्कन्दाय नमः । ॐ इन्द्राय नमः । ॐ विशाखाय नमः । ॐ षष्ट्ये नमः । ॐ षण्मुखाय नमः ।

* * *

144. स्कन्दे विशेषप्रायश्चित्तहोमः

(गुरुतरे दोषे सति)

सुब्रह्मण्ये नवहोमपक्षे प्रासादस्याष्टदिक्षु अग्रे च इति नवकुण्डेषु पञ्चहोमपक्षे चतुर्दिक्षु अग्रे च इति पञ्चकुण्डेषु होमाः । अग्रकुण्डेऽग्निं जनयित्वा तस्मादन्यकुण्डेष्वग्निं विहृत्य प्रायश्चित्तहोमान् कुर्युः ।

अन्वाधानम् - प्रधानदेवतां स्कन्दं सकलमन्त्रेणाष्टोत्तरशत-वारं कदम्बसमिद्भिः,

बीजमन्त्रेणाष्टोत्तरशतवारं चरुद्रव्येण,

महन्मन्त्रेणाष्टोत्तरशतवारम् आज्येन,

बीजमन्त्रेणाष्टोत्तरशतवारं सर्षपद्रव्येण,

पुनः बीजमन्त्रेणाष्टोत्तरशतवारं तिलद्रव्येण,

अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् .... ॥

सकलमन्त्रः - आं ईं ॥

महन्मन्त्रः - गृं गुहाय नमः ॥

बीजमन्त्रः - घृं झृं जं धां म्रं व्योम् ॥

आचार्यकुण्डे - कदम्बसमिधः । पूर्वे - वटाः । दक्षिणे - उदुम्बराः । पश्चिमे - अश्वत्थाः । उत्तरे - प्लक्षाः । आग्नेये - पलाशाः । निर्ऋतौ - मधूकाः । वायव्ये - जम्बवः । ईशाने - कपित्थाः ॥

* * *

145. स्कन्दे शान्तिहोमः

(अद्भुतदर्शनशान्तिः)

ऐशान्ये चतुरश्रकुण्डे अग्निं जनयित्वा हुनेत् ।

अन्वाधानम्-

प्रधानदेवतां सुब्रह्मण्यं गायत्र्या प्रत्येकम् अष्टोत्तरशतवारं प्लक्षोदुम्बरवटाश्वत्थसमित्-मधुक्षीराज्याप्लुतदूर्वा-घृतचरुलाज-सर्षपयवतिलशालिसक्तुघृताख्यचतुर्दशद्रव्यैः अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् .... ।

* * *

146. शास्तरि कलशाधिवासहोमः

अन्वाधानम् प्रधानदेवतां शास्तारं षण्मन्त्रैः षड्विंशतिमन्त्रैश्च एकैकवारमाज्येन पुनः मूलमन्त्रेण पलाशसमिदाज्यचरु-लाजव्रीहियवसर्षपतिलाख्याष्टद्रव्यैः अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम् .... ॥

समिदाज्यचरून् लाजान् व्रीहींश्च यवसर्षपान् ।
तिलांश्च होमयेदष्टावेवं मूलेन शास्तरि ॥

शास्तृषण्मन्त्राः - ॐ रेवन्ताय नमः । ॐ महाशास्त्रे नमः । ॐ गोप्त्रे नमः । ॐ प्रभवे नमः । ॐ दीप्त्रे नमः । ॐ प्रशास्त्रे नमः ।

षड्विंशतिनाममन्त्राः - ॐ आर्याय नमः । ॐ शास्त्रे नमः । ॐ गुहासन्नाय नमः । ॐ सेनान्ये नमः । ॐ भूतवल्लभाय नमः । ॐ रुद्रजाय नमः । ॐ रूपवते नमः । ॐ कामिने नमः । ॐ वरदाय नमः । ॐ लोकपूजिताय नमः । ॐ नीलाश्वाय नमः । ॐ श्वेतमातङ्गाय नमः । ॐ श्यामिने नमः । ॐ पीतानुलेपनाय नमः । ॐ रक्तमालाधराय नमः । ॐ शूराय नमः । ॐ मायाय नमः । ॐ मातृगणप्रियाय नमः । ॐ कालवाससे नमः । ॐ गणाध्यक्षाय नमः । ॐ खड्गहस्ताय नमः । ॐ धनुर्धराय नमः । ॐ सहजायाय नमः । ॐ जनावेशाय नमः । ॐ साधवे नमः । ॐ संसाररक्षकाय नमः ॥

बहुकलशविधौ बिम्बाधिवासे च शास्तरि अधिवासहोमाः

गुरुकुण्डे अग्निं जनयित्वा उपस्थानमन्त्रेण अग्निं नमस्कृत्य स्वस्वाग्निविहरणमन्त्रैः गुरुकुण्डात् परिकुण्डेषु अग्निं विहृत्य होमयेत् ॥

पश्चिमवायव्यमध्ये चतुरश्ररूपगुरुकुण्डे-

उपस्थानमन्त्रः- अग्निं दूतं वृणीमहे......... । १,१२,१

अन्वाधानम्- प्रधानदेवतां शास्तारं षण्मन्त्रषड्विंशतिमन्त्रैः सकृत्सकृदाज्येन, पुनर्मूलेन पलाशसमिदाज्यचरुलाजव्रीहियवसर्षपतिलाख्याष्टद्रव्यैः प्रत्येकम् अष्टोत्तरशतवारम् अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम्....... ॥

पूर्वे चतुरश्रकुण्डे -

अग्निविहरणमन्त्रः- अग्निमीळे पुरोहितम्.........॥१,१,१

अन्वाधानम्- प्रधानदेवतां शास्तारं षण्मन्त्रषड्विंशतिमन्त्रैः सकृत्सकृदाज्येन, पुनः पलाशसमिदाज्यचरुलाजव्रीहियवसर्षपतिलाख्याष्टद्रव्यैः क्रमेण मूलमन्त्र-गायत्री-हृदयमन्त्र-शास्त्रादिमन्त्र-आर्यादिमन्त्र-नमस्तेभवादिमन्त्र-शरादिमन्त्र -पूर्वदिक्पालमन्त्रैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् .... ।

आग्नेये अश्वत्थपर्णरूपकुण्डे -

अग्निविहरणमन्त्रः- अग्निमीळे पुरोहितम् ...... ।

अन्वाधानम्- प्रधानदेवतां शास्तारं षण्मन्त्रषड्विंशतिमन्त्रैः सकृत्सकृदाज्येन पुनः खदिरसमिदाज्यचरुलाजव्रीहियवसर्षपतिलाख्याष्टद्रव्यैः क्रमेण मूलमन्त्र-गायत्री-हृदयमन्त्र-शास्त्रादिमन्त्र-आर्यादिमन्त्र-नमस्तेभवादिमन्त्र-शरादिमन्त्र -आग्नेयदिक्पालमन्त्रैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् .... ।

दक्षिणे अर्धचन्द्रकुण्डे-

अग्निविहरणमन्त्रः- अग्निमीळे पुरोहितम् ...... ।

अन्वाधानम्- प्रधानदेवतां शास्तारं षण्मन्त्रषड्विंशतिमन्त्रैः

सकृत्सकृदाज्येन, पुनः अश्वत्थसमिदाज्यचरुलाजव्रीहियव-सर्षपतिलाख्याष्टद्रव्यैः क्रमेण मूलमन्त्र-गायत्री-हृदयमन्त्र-शास्त्रादिमन्त्र-आर्यादिमन्त्र-नमस्तेभवादिमन्त्र-शरादिमन्त्र -दक्षिणादिक्पालमन्त्रैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम्....... ॥

नैर्ऋत्ये त्रिकोणकुण्डे -

अग्निविहरणमन्त्रः- अग्निमीळे पुरोहितम् ..... ॥

अन्वाधानम्- प्रधानदेवतां शास्तारं षण्मन्त्रषड्विंशतिमन्त्रैः सकृत्सकृदाज्येन, पुनः प्लक्षसमिदाज्यचरुलाजव्रीहियवसर्षप-तिलाख्याष्टद्रव्यैः क्रमेण मूलमन्त्र-गायत्री-हृदयमन्त्र-शास्त्रादिमन्त्र-आर्यादिमन्त्र-नमस्तेभवादिमन्त्र-शरादिमन्त्र -नैर्ऋत्यदिक्पालमन्त्रैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं, चरुशेषेण स्विष्टकृतम् .... ॥

पश्चिमे वृत्ताकारकुण्डे -

अग्निविहरणमन्त्रः- अग्निमीळे पुरोहितम् ..... ॥

अन्वाधानम्- प्रधानदेवतां शास्तारं षण्मन्त्रषड्विंशतिनाम-मन्त्रैः सकृत्सकृदाज्येन पुनः वटसमिदाज्यचरुलाज-व्रीहियवसर्षपतिलाख्याष्टद्रव्यैः मूलमन्त्र-गायत्री-हृदयमन्त्र-शास्त्रादिमन्त्र-आर्यादिमन्त्र-नमस्तेभवादिमन्त्र-शरादि-मन्त्र-पश्चिमदिक्पालमन्त्रैः प्रत्येकम् अष्टोत्तरशतवारम्

अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् ....।

वायव्ये षडश्रकुण्डे -

अग्निविहरणमन्त्रः- अग्निमीळे पुरोहितम् ..... ॥

अन्वाधानम्- प्रधानदेवतां शास्तारं षण्मन्त्रषड्विंशतिमन्त्रैः सकृत्सकृदाज्येन, पुनः उदुम्बरसमिदाज्यचरुलाजव्रीहियवसर्षपतिलाख्याष्टद्रव्यैः क्रमेण मूलमन्त्र-गायत्री-हृदयमन्त्र-शास्त्रादिमन्त्र-आर्यादिमन्त्र-नमस्तेभवादिमन्त्र-शरादिमन्त्र-वायव्यदिक्पालमन्त्रैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् .... ।

उत्तरे पद्माकारकुण्डे -

अग्निविहरणमन्त्रः- अग्निमीळे पुरोहितम् ...... ।

अन्वाधानम्- प्रधानदेवतां शास्तारं षण्मन्त्रषड्विंशतिनाममन्त्रैः सकृत्सकृदाज्येन, पुनः बिल्वसमिदाज्यचरुलाजव्रीहियवसर्षपतिलाख्याष्टद्रव्यैः क्रमेण मूलमन्त्र-गायत्री-हृदयमन्त्र-शास्त्रादिमन्त्र-आर्यादिमन्त्र-नमस्तेभवादिमन्त्र-शरादिमन्त्र-उत्तरदिक्पालमन्त्रैः प्रत्येकम् अष्टोत्तरशत वारं, अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णासहुतिसहितं, चरुशेषेण स्विष्टकृतम् .... ॥

ऐशान्ये अष्टाश्रकुण्डे -

अग्निविहरणमन्त्रः- अग्निमीळे पुरोहितम् ...... ।

अन्वाधानम्- प्रधानदेवतां शास्तारं षण्मन्त्रषड्विंशतिनाममन्त्रैः सकृत्सकृदाज्येन पुनः अपामार्गसमिदाज्यचरुलाजव्रीहियवसर्षपतिलाख्याष्टद्रव्यैः क्रमेण मूलमन्त्र-गायत्री-हृदयमन्त्र-शास्त्रादिमन्त्र-आर्यादिमन्त्र-नमस्तेभवादिमन्त्र-शरादिमन्त्र-ईशानदिक्पालमन्त्रैः प्रत्येकम् अष्टोत्तरशतवारम् अष्टाविंशतिवारं वा अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् .... ।

मूलमन्त्रः- ॐ घ्रूं नमः पराय गोप्त्रे ।

गायत्री - भूताधिपाय विद्महे भवपुत्राय धीमहे । तन्नः शास्ता प्रचोदयात् ।

हृदयमन्त्रः - ॐ रेवन्ताय हृदयाय नमः ।

शास्तृमन्त्रः- ॐ शास्त्रे नमः गोप्त्रे नमः भूताधिपतये नमो नमः ।

आर्यादिमन्त्रः- ॐ आर्याय विश्वगोप्त्रे सेनान्यै नमो नमः ।

नमस्ते भवादिमन्त्रः-

नमस्ते भवपुत्राय भवतुल्यबलाय च ।
वरदाय नमस्तेऽस्तु भक्तप्रियहिताय वै ॥

शरादिमन्त्रः-

शं शराय नमस्तेऽस्तु नमः कुक्कुटकेतवे ।
नमस्ते नीलरूपाय नीलाम्बरधराय च नमो नमः ॥

दिक्पालमन्त्राः-

ॐ इन्द्राय सुराधिपतये सायुधवाहनपरिवाराय नमः ।

ॐ अग्नये तेजोऽधिपतये सायुधवाहनपरिवाराय नमः ।

ॐ यमाय प्रेताधिपतये सायुधवाहनपरिवाराय नमः ।

ॐ निर्ऋतये रक्षोऽधिपतये सायुधवाहनपरिवाराय नमः ।

ॐ वरुणाय जलाधिपतये सायुधवाहनपरिवाराय नमः ।

ॐ वायवे प्राणाधिपतये सायुधवाहनपरिवाराय नमः ।

ॐ सोमाय नक्षत्राधिपतये सायुधवाहनपरिवाराय नमः ।

ॐ ईशानाय विद्याधिपतये सायुधवाहनपरिवाराय नमः ।

* * *

शास्तरि पञ्चहोमपक्षे गुरुकुण्डे चतुर्षु परिकुण्डेषु च मूलमन्त्रेण समिदाज्यचरुलाजसर्षपयवतिलाज्यानीति अष्ट-द्रव्याणि जुहुयुः । अत्र मध्ये पलाशसमिधः प्रागादिचतुर्दिक्षु अश्वत्थवटप्लक्षशमीसमिधः स्युः ॥

* * *

147. रेवन्तप्रोक्तप्रायश्चित्तहोमः

(क्षेत्रे मृतिर्जननमित्याद्युक्तदोषप्रायश्चित्तम्)

प्रासादस्य दक्षिणभागे अर्धचन्द्रकुण्डे अग्निं जनयित्वा हुनेत् ॥

अन्वाधानम्- प्रधानदेवतां शास्तारं षण्मन्त्रैः षड्विंशति-नाममन्त्रैश्च सकृत्सकृदाज्येन, पुनः षण्मन्त्रैः प्रतिमन्त्रं सप्तदशवारम् (६x१७= १०२) आहत्य द्व्युत्तरशतवारं बिल्वसमिदाज्यचरुलाजसर्षपयवतिलाख्यसप्तद्रव्यैः

भूरादिव्यस्तसमस्तव्याहृतिभिः क्रमेण आज्यक्षीरदधिक्षौद्रद्रव्यैः अष्टोत्तरशतवारं, पुनः मृत्युञ्जयमन्त्रेण (ॐ जूं सः) त्रिमधुरसिक्तदूर्वाद्रव्येण त्रिसहस्रवारम् अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम्............. ॥

* * *

148. शास्तरि शान्तिहोमः

ऐशान्ये चतुरश्रकुण्डे अग्निं जनयित्वा हुनेत् ।

अन्वाधानम्- प्रधानदेवतां शास्तारं गायत्र्या प्रत्येकम् अष्टोत्तरसहस्रवारं तिलाज्यद्रव्याभ्याम् अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् .... ॥

गायत्री- भूताधिपाय विद्महे भवपुत्राय धीमहे । तन्नः शास्ता प्रचोदयात् ॥

* * *

149. यात्राहोमः

(अवभृथस्नानदिने क्रियमाणः)

कनिक्रदादिषण्मन्त्रैः स्वस्त्यादिपञ्चमन्त्रैश्च एकैकवारमाज्येन पुनर्मूलमन्त्रेण मूलदेवम् अष्टाविंशतिवारं समिदाज्यचर्वाज्यद्रव्यैः अन्तरान्तरा पूर्णाहुतिसहितं चरुशेषेण स्विष्टकृतम् .... ॥

* * *

150.

नागप्रतिष्ठाहोमः

अत्र प्रधानं प्रधानदेवतां वासुकिनागराजं 'नमो अस्तु सर्पेभ्यः' इत्यादित्रिभिर्मन्त्रैः प्रत्येकम् अष्टाविंशतिवारं समिच्चर्वाज्यद्रव्यैः, पुनः अष्टोत्तरशतवारं समस्तव्याहृत्या आज्याक्ततिलद्रव्येण, चरुशेषेण स्विष्टकृतम् .... ॥ (नागगायत्र्या पक्वम्)

* * *

अन्वाधानसङ्ग्रहस्यास्य सम्पादने उपयुक्ता ग्रन्थाः

१. ब्रह्मकर्मसमुच्चयः
२. प्रयोगपारिजातः
३. शतशान्तिप्रकाशिका
४. शान्तिरत्नाकरः
५. नैमित्तिककर्मसङ्ग्रहः
६. तन्त्रसमुच्चयः
७. अनुष्ठानपद्धतिः
८. वयोवस्थाभिधशान्तिसमुच्चयः
९. तन्त्रसारसङ्ग्रहः

* * *